राज्यदंभुक्तिमुक्तिदं॥ ८३॥ कृतंमरकतेयंत्रंसर्वशत्रुविनाशनं॥ लोहत्रयोद्भवंयंत्रंसर्वसिद्धिकरंमतं॥ ८४॥
श्रीखण्डेशान्तिदंज्ञेयंपौष्टिकंरक्तचंदने॥ श्रीपर्णीपीठमुद्दिष्टंपूजार्थंधनराज्यदं॥ ८५॥ वैदूमेवकुलाबुपन
भूर्जपत्रेचनृपःप्रभुः॥ गारुडीभवपाषाणोभुक्तिर्मुक्तिरहूरतः॥ ८६॥ भूमौसिंदूररजसारचितंसर्वकामदं
सीसकांस्यादिसुकृतेसंपत्तिंसंततिंहरेत्॥ ८७॥ फलकायांपरेभिन्नौस्थापयेच्चकलावन॥ स्थापितंय
दिमोहेननाशयेत्तद्धनंकुलं॥ ८८॥ अग्निरेखातविस्तारंप्राग्प्रस्थादक्षिणोत्तरं॥ पलप्रमाणकंतंयमर्चा
पीठंमनोहरं॥ ८९॥ पवाकौर्वृप्रकुर्वीतस्वच्छरस्वांसमंततः॥ तस्मिन्पीठेतुनिर्माणंपूजाचक्रस्यकारयेत्
९०॥ माणिक्यादिकपीठंतुमानस्तुमंतुदोषकृत॥ श्रीपर्णीचंदनादीनामधिकचेत्रदोषकृत्॥ ९१॥ ल
ग्नेशुभग्रहोपेतेनकुलगनशालिनि॥ प्रतिष्ठांकारयेदेषांस्वर्क्षतिथ्यादिकेक्षणे॥ क्षौद्राज्यदुग्धैःप्रथमं
नालिकेराम्भसाततः॥ अभिषिच्याथतोयेनकपिलेनाक्षरैषधैः॥ ९२॥ आवाह्याभ्यर्चनंतत्रगेचक्रंसं

॥पे.तं॥
॥५५॥

स्याच्च पूजयेत॥ गंधपुष्पैर्नैवेद्यधूपैर्दीपैर्नैवेद्यदर्पणैः॥९४॥ त्रैरात्रं पूजयेद्देवीं त्रिसंध्यं च तथा निशि॥ मका
रैः पंचभिर्युक्तं चरेद्युर्वामिनोर्चनं॥९५॥ निशायां शक्तिपूजां च वह्नीयां गंच कौलिका॥ एवं दिनत्रयं कृत्वा
नमो नित्यक्रमेभजेत॥९६॥ एवं देवीप्रतिष्ठायां क्रमः सान्निध्यकारकः॥ स्त्रीशूद्राणां वापितो च कौलिका
नामयं विधिः॥९७॥ महापापं न कुर्वीत पिपशुपदे दमागतः॥ अग्निः शुचिव्रततमः शुचिर्विप्रः श्रुतीरि
तो॥९८॥ अज्ञानेनेश्चलगुभिः संध्यावन्दनं नाशिने॥ यानकैलेमतिप्यं तेन स्मात्रे पशवः स्मृता॥९९
वामे नोपासितं यत्रं तेषां दृष्टिपथं गतं॥ न देवताक्षोभकरा विक्षिप्तः साधको भवेत॥५००॥ दक्षिणोपासितं यंत्रं स्व
र्यापि समनेजसे॥ पापिनां दृष्टिदहनपुल्लकानां यथा रवि॥१॥ यथा जुमिर्दिनकरोदये सर्वं विरीक्ष्यते॥ दक्षसंस्था
पितं यंत्रं तथा पुराणासुमनो मतं॥२॥ सर्वेषामेव भूतानां तुल्य दुःखसुखात्मभौ॥ वामदक्षिणाहस्तौ च न ह्यागौ दिवोक
सा॥३॥ प्राधान्यं तु परं स्त्रीणां वामांगं दक्षिणं नके॥ पुंसां तथैव माज्ञेपि कार्याकार्यविभेदतः॥४॥ काण्डाश्चगोल
काज्ञातिविख्याताः कर्मविख्याता॥ असंस्कृतास्वयेविप्रास्तेव्रात्याः परिकीर्तिताः॥५॥ ब्राह्मणापहानिकृतेषां म
द्यमांसं च मैथुनं॥ अत्रास्वल्पपापहाम मार्गप्रवृत्ते संस्कसेविते॥६॥ कौलेन चाथ वामेन सिद्धांतीयेन वा पुनः॥ सिद्धे
संजायते स्वेषां नरकायैव केवलं॥७॥ आदौ वेदोदितैर्मंत्रैर्विप्रोऽभ्युत्थारणं चरेत॥ आगतिर्मितयं चाराणां मूर्तिनां च
विशेषतः॥ ८॥ अग्निः सप्तिवीं जापितिसर्वा साग्रेऽध्यते॥ प्रतिष्ठिता पृछंदउक्तं देवताग्निः प्रकीर्तितः॥९॥

55

॥पृः॥
॥५५॥

अभिशादेनराहितं समूलमेनद्धलं पठेत् ॥ अभिषिंचेत्कुद्रनोयेस्मनः संपूर्णास्त्रकेके ॥ १० ॥ अभ्यर्षिंचेत्तनाहस्त्या ऽस्त्रजा
रराग्मिदंस्थनं । क्षालयेज्जानुजं यंत्रपादाद्याज्ञेन निस्मृशः ॥ ११ ॥ पिष्टान्तकाष्ठैः काष्ठस्थमप्यापादैः केवलं जलान
एवं प्रक्षालितं यंत्रं मराग्ये चंदनादिना ॥ १२ ॥ पुरतः स्थापयेत्पीठे दशाङ्गुल्यां जलितः ततः ॥ मूलमंत्रेणाथवापि व
स्यादेवाग्रतस्तु रेत् ॥ १३ ॥ बृजेनवेष्टयेत्तस्याक्षि कोणांचंदनांभसा ॥ नद्यहिश्चतुरस्रं चवि दिक्षान्मन्तमुद्रया ॥ १४
संपूज्यगंधैर्देवार्घ्यमराय्लायनमोरामना ॥ अंगानिचतुरस्यादिकोणेषु पुरतस्तथा ॥ १५ ॥ दिक्षुवाग्रतसमध्य
र्व्यं शंखाधारं प्रतिन्यसेत् ॥ आधारेणाविनाप्रंशोनतथ्यं निचमानरः ॥ १६ ॥ तस्माद्धि षिवसाधारं त्रिपदं वा
चतुष्पदं ॥ पञ्चा भंवात्रिकोणं वायोस्याप्यं धातुजं ततः ॥ १७ ॥ मूलांते वामुकाधारपात्रं संस्थापयामिच
उक्त्वा शंखादिकाधारं मराग्लेस्थापयेत्तथा ॥ १८ ॥ परं वर्मप्रदेत्युक्त्वा वदेद्दशकलात्मने ॥ इति कन्दर्पराग्
लं वदेव नाम च कीर्तयेत् ॥ १९ ॥ ततोर्घपात्रधाराय नमः प्रोक्त्वा प्रपूजयेत् ॥ वह्नेर्दशकलाः पूज्यास्तत्र प्रो
क्ताः प्रदक्षिणं ॥ २० ॥ अस्त्रमंत्रेण चततः कनकादिविनिर्मितं ॥ अर्घ्यादिपात्रमथवा शंखमस्त्रेणतज्जलेः
२१ ॥ प्रक्षाल्यामुकदेवार्घ पात्रं प्रतिष्ठापयामि एवमुक्त्वा तदाधारे संस्थाप्यैवं वदेत्पुनः ॥ २२ अर्घप्र
दद्याद्दशेति कलात्मने त्वदेवतः ॥ सूर्यमंडलमुवार्घ्य इत्ये देवस्यनाममनु ॥ २३ ॥ अर्घपात्राय वततमोम
नुनानेतपूजयेत् ॥ तत्पात्रमथ तत्रैव भावयेद्रुलिमण्डलं ॥ २४ ॥ पद्मोगानत्र्चांगानिदत्तयेत्पूर्ववत्ततः
कलाद्वादश सूर्यस्य प्रोक्ताः पात्रेषु दक्षिणं ॥ २५ ॥ ततः सुधामयैः स्तोयैर्मूलांते मानृकां पठन् ॥ विलोमां प्र

॥मे.त.॥
॥५६॥

रयेत्प्रास्निन्रपूजकोमृतनामुना ॥२६॥ ॐ संकामप्रदेन्दुकलाषोडशान्तिकलात्मने नमः एवंदशार्णोयंमंत्रःशंखप्रपू
रणे ॥२७॥ गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपान् ॥ दूर्वाइत्यर्घपात्रस्यप्रोक्तोऽर्घ्याष्टकंबुधैः ॥२८॥ तत्तोयं
गंधपुष्पाद्यैःपूजयित्वासमर्चयेत् ॥ कलाषोडशकंचाऽपिपश्चात्सर्वकलाश्च वा ॥२९॥ प्राणप्रतिष्ठांकुर्वीतपू
जांते साधकसत्तमः ॥ आवहतीर्थसमावाह्यमूलमंत्रेणतत्त्ववित् ॥३०॥ संयोज्यनेत्रमंत्रेणपुष्पंसंस्पृश्यचावगुं
ठनात् ॥ प्रदर्श्यगालिनीमुद्रांमुद्रयाधेनुसंज्ञया ॥३१॥ अमृतीकृत्यविधिवत्सुधाबीजेनसाधकः ॥ ध्यात्वेष्टदेव
तांतत्रसकलीकरणांचरेत् ॥३२॥ अंगन्यासेनचास्त्रेणकलयेद्वादिशोदश ॥ नेत्रमंत्रेणसंवीक्ष्यमुद्रया
शंखसंज्ञया ॥३३॥ अवगुण्ठनतोरक्षांमुद्रयायोनिरूपया ॥ गंधपुष्पादिभिस्तत्रपूजयेदिष्टदेवतां ॥३४॥
षडंगानिचतत्पूज्यमंत्रयेन्मूलमंत्रतः ॥ अष्टकृत्वस्ततश्चार्घ्यंछादयेन्मत्स्यमुद्रया ॥३५॥ तच्छंखस्थंजलं
किंचित्कुंभतोयेविनिःक्षिपेत् ॥ अर्घ्यस्थोत्तरदिग्भागेपाद्यमाचमनीयकं ॥३६॥ मधुपर्कंचसंस्थाप्यत्रि
कोणेचयथाक्रमं ॥ एकैकपात्रंमूलेनत्वष्टकृत्वोऽभिमंत्रयेत् ॥३७॥ मधुपर्कंसमक्षौद्रंदधिनचेन्न
लभ्यते ॥ दधिऽभावऽक्षौद्रेघृतप्रतिनिधिर्हि ॥३८॥ पारमंत्रस्पदंदेवामधुसंज्ञंतदुच्यते ॥ तदर्प्यते
येनकर्मेतत्प्रोक्तंमधुपर्ककं ॥३९॥ कांस्यस्यवाथरूप्यस्यशोवेश्चंतद्वितरौ ॥ सताशांशोवामधुपार्केस्फा
टिकंग्रहणायके ॥४०॥ दक्षिणेऽप्रोक्षिणीपात्रमादायाद्भिःप्रपूरयेत् ॥ किंचिदर्घ्यंतुसंन्यस्यप्रोक्षणींसम्प्र
योजयेत् ॥४१॥ पुनराचमनीयार्घ्यंपात्रंसंस्थापयेत्ततः ॥ पाद्यंश्यामाकदूर्वाब्जविष्णुक्रांताभिरुच्यते ॥

56

॥राम:॥
॥५६॥

४२ ॥ जातीलवंगकंकोलैर्मनसाचमनीयकं ॥ उशीरपुष्पयवश्री । ह्रिवरुमूलन्तमालकं ॥ ४३ ॥ दापयेत्प्रोक्षणीपा
त्रेभसितं पुराचेतसः ॥ उक्तामिरं डिविह्रिं त्रेपुनराचमनीयकं ॥ ४४ ॥ ऽर्घ्याभावे प्रदातव्याः क्षालितानामपु
लाः शुभाः ॥ अथार्घादिकपात्राणां फलं वक्ष्ये शुभाशुभं ॥ ४५ ॥ सर्वकामप्रदं स्वर्णं रौप्यमायुःसुतप्रद
सौभाग्यं ताम्रपात्रेण धर्मवृद्धिश्च मृन्मये ॥ ४६ ॥ नालिकेरे देवतुष्टिः पुष्टिस्काचसंभवं ॥ लक्ष्मी
प्राप्तिर्बिल्वपात्रे त्वालरापत्रलहृक्षजे ॥ ४७ ॥ मारणोच्चाटने लोहं स्तंभः पाषाणजे भवेत् ॥ कैवल्याराधने
काष्ठे वा यममार्गे उतांविके ॥ ४८ ॥ रत्नादीनां तु पात्राणि शुभरेखांकितानि च ॥ अर्घ्यं नैवेद्यपूजार्थ
बलिहोमेषु कल्पयेत् ॥ ४९ ॥ पात्राणामादरः कार्यः पात्राणापे वीत्तमगतिः ॥ बलिहोमक्रियार्घ्ये हि वि
नापात्रेण न सिद्ध्यति ॥ ५० ॥ षट्त्रिंशदंगुलं पात्रमुत्तमं परिकीर्तितं ॥ मध्यमं त्रिभागोनं कनिष्ठं द्वादशांगुलं
५१ ॥ वर्त्तुलं विहीनं तु न पात्रं कारयेत्क्वचित् ॥ नाभीविवरतूपाणि पुष्याकाहृतिनिच ॥ ५२ ॥ शंख
नीलोपलाभानि पात्राणि परिकल्पयेत् ॥ श्वेतादीस्यसितान्तानि विप्रादीनां क्रमेण च ॥ ५३ ॥ सेवये
त्प्रोक्षणीपात्रं तोयैर्मूलाणुमुच्चरन् ॥ आत्मासनं यागवस्तुनि पूजाऽर्घ्याणि मंडलं ॥ ५४ ॥ दर्शयेद्धेनुमु
द्राचऽर्घ्यशुद्धिर्यंत्रपूजा ॥ योगपीठन्यासदेवाः तत्तत्स्थाने प्रपूजयेत् ॥ ५५ ॥ मणिपीठं भावयेत्ततः
पूज्याऽस्य देवता ॥ आत्मानं देवतारूपं ध्यायन्मूलेन पंचतु ॥ ५६ ॥ पुष्पस्यांजलयो देवा मानसे के हृदये
दे ॥ पादयोः सर्वगात्रे च पूजयेद्वंदनादिभिः ॥ ५७ ॥ स्वतुभिस्तपवारैश्च ततो नैवेद्यं निवेदयेत् ॥ गत्वपदिष्ट

॥ मे. तं. ॥
॥ ५७ ॥

विधिनाशेषमन्यत्समापयेत् ॥५८॥ प्रोक्षणाद्भिः प्रयुंजीत सर्वमेतत्समाहितः ॥ ततस्त्वाभ्यंतरं कार्यमग्निकार्यं
बुद्धीमता ॥५९॥ मूलाधारे चतुष्कोणमग्निकुंडं विचिंतयेत् ॥ तत्राग्निं कुण्डलीरूपं ध्यायन्मूलं समुच्चरेत्
हु ॥ धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा ॥ सुषुम्नावर्त्मना नित्यमक्षवृत्तिर्जुहोम्यहं ॥६१॥ पुण्यं जुहो-
मि स्वाहेति मन्त्रो कांते प्रोच्चरेत्पुनः ॥ पुनर्मूले पुनश्चोक्तः पुनः पापं जुहोमि वै ॥६२॥ हुत्वा कुम्भे च संकल्पो वि-
कल्पो धर्म एव च ॥ हुत्वा पृथक् स्वाहांतं न पुनः श्लोकपिंडं पठेत् ॥६३॥ प्रकाशामर्शहस्ताभ्यामवलंब्योन्म-
नी स्रुवं ॥ धर्माधर्मकलास्नेहं पूर्णं वह्नौ जुहोम्यहं ॥६४॥ स्वाहांतेनाहुतिं दत्वा प्राणायामनिरोधतः ॥
निरस्तनिखिलोपाधिमात्मानं चिन्मयं स्मरेत् ॥६५॥ प्राणायामत्रयं कृत्वा ऋष्यादिन्यासमाचरेत्
कृत्वा षडंगन्यासं च मंत्रमष्टोत्तरं शतं ॥६६॥ जपित्वा देवतायै तं दर्पयेद्धर्मतोयतः ॥ पूजाचक्रं स-
मभ्युत्स्य वहिर्यागं ततश्चरेत् ॥६७॥ पूजापीठं विनिर्माय पूजयेत्पीठदेवता ॥ गणपं क्षेत्रदं च पूज्या
महागणपतिं स्थापक ॥६८॥ पूजयेदनलादीनि देवतान्याधम्मसप्र च ॥ मंडूकश्चापि तस्योर्द्ध्वं रुद्रः
कालानलाननः ॥६९॥ मूलप्रकृतिमाधारशक्तिं शक्तिं कूर्ममनंतकं ॥ वाराहं तस्य दंष्ट्राग्रे पृथिवीम-
र्चयेत्पुनः ॥७०॥ तस्याः सुधार्णवं तस्मिन् द्वीपे वनवरं तत्र ज ॥ स्वर्णद्वीपं च तन्मध्ये नंदनं वनं ॥
७१॥ तन्मध्ये कल्पवृक्षांश्च तन्मध्ये रत्नभूमिकां ॥ स्वर्णप्राकारमध्यां तन्मध्ये रत्नमंडपं ॥७२॥ तस्यां-
तः स्वर्णवेदीं च रत्नसिंहासनं पुनः ॥ वेदीमध्ये भावयित्वा पूजयेद्वस्त्रादिना ॥७३॥ पूजाचक्राधारपा

57

॥ उप: ॥
॥ ७ ॥

ठसिंहासनमपि निस्मरेत् तत्पादेषु यजेत्सम्यगाग्नेयादिदिशि वांतकं १४ धर्मं वृषतनुं रक्तं ज्ञानं कृष्णं च सिंहवत् वैराग्यं भू
तवत्पीतमैश्वर्यं कृष्णहस्तिवत् १५ अधर्मादींश्चित्रवर्णान् पीठस्याधः समर्चयेत् मायाविद्ये च तन्मध्ये नंतं तत्सा
कूर्मं यजेत् १६ तस्यमूर्ध्नि यजेत्पद्मं अष्टप्रकृतिपत्रकं आनंदकंदकं संवित्रालं विकारकेसरं १७ कर्णिकां
मानकारूपां तत्पत्रेषु क्रमाद्यजेत् सिद्धीरष्टौ क्रमाद्याक्र अणिमाद्यप्रकामना १८ लघिमेशित्वमहिमो
वशित्वप्राप्तिगौरवे अधोधः कार्णिकायाश्च सोमसूर्यलथानल १९ गणांस्त्वादिकांस्तत्र तद्दक्षिवर्यं
यजेत् ब्रह्मविष्णुमहेशांश्च ततो दिक्षु च मध्यतः २० ज्ञानमायाकलाविद्यापरपूर्वं च तत्त्वकं केसरेषु त
था मध्ये पूर्वादिषु यथाक्रमं २१ ततस्तं ज्ञोक्तपीठस्य नवशक्तीः प्रपूजयेत् पीठमंत्रेण गंधाद्यैः पीठमध्ये त
तोऽर्चयेत् २२ चतुर्थीनमसायुक्तैः स्वैः स्वैरेव तु नामभिः मध्ये पुष्पांजलिं दद्यात् पीठमंत्रेण साधकः २३ मूल
मंत्रं समुच्चार्य पुष्पांजलिं पीठे नाम च मूर्त्तिं च कल्पयामीति मूर्त्तिं मध्ये विनिःक्षिपेत् २४ पुनर्मूलं समुच्चार्य
देवतामततः परं मूर्त्तिं वदद्यपामीतिना पुष्पैस्ता समर्चयेत् २५ अथेष्टदेवताप्रीत्यै यजेदायतनान्य
पि ईशोत्रे नेशजं शिवाद्याविष्णुजेन सा २६ रवावीशो शजानीभादेवां शिशित्रभाक्वराः गणोशे तेश
भादेव्यो मृत्युर्ध्वां ईशादिकोणतः २७ एकपीठे पृथक्पूजां विना यंत्रं करोति यः तंत्रेण पूजये यंत्रं स देवशा
पमाप्नुयात् २८ आवाह्य देवतामेवामर्चयेद्वा यदेवताः अन्ययंत्रे तु पूजा ता देवताशापकारिणी २९
पूजनं च ह्यमूर्तिनामेकपीठे भवेद्यदि पृथक् च वंदनं पुष्पाणि धूपदीपादिकं ततः ३० खण्डिते स्फुटिते दग्धे
भ्रष्टे माने विवर्जिते व्यंगोऽनलेपक्षाप्यदृष्टे पतिते दुष्टभूमिषु ३१ अन्यमंत्रार्चिते चैव पतितस्पर्शदूषिते दश

॥ पेतं· ॥
॥ ५८ ॥

स्वेनेष्टुनो कार्यः सन्निधानं दिवौकसः ॥ ८२ ॥ गरोशास्तूर्यविष्विशादेवीनां पूजनं त्वमान ॥ दशास्थानानि देवानां पूजनार्थं कल्पितानि च ॥ ८३ ॥ सान्निध्यं सर्वदेवानां मवस्पमंत्रतो भवेत् ॥ मंत्रमुर्जीवरप्रोक्तः प्रतिमाथं शरीरवत् ॥ ८४ ॥ मिद्रायामपि सामन्यो विना मंत्रं फलेन हि ॥ शिवलिंगे गरौ यंत्रे शालिग्रामे घटेरवौ ॥ ८५ ॥ स्थण्डिलेग्नौ मूर्द्धि हृदि ध्यानेष्वेतेषु पूजयेत् ॥ भूमा वेवकृतापूजा पुत्रापुष्कलाह्यिनि ॥ ८६ ॥ दशांगलप्रमाणाणावा निथ्यंगुलमितापि वा ॥ स्वभ्यर्च्या प्रतिमा वि ष्टो गृहे भगृहमेविधिभि ॥ ८७ ॥ पंचसूत्रसपाष्क्ते शिवलिंसमर्चयेत् ॥ गृहस्थानां भुक्तिमुक्तिधनारोग्यप्रदंनुतत ॥ ८८ ॥ लिंगमस्तकविस्तारो यावत्तावत्तदीर्घता ॥ लिंगस्य लिंगशालकपात्रलहर्षालथेवच ॥ ८९ ॥ लिंगपाटस्य पंचानां समनायं चतुष्त्रिका ॥ शालिग्रामसमुत्पत्तिं भगवनु परमाद्भुतां ॥ ९० ॥ गांग्याकाः श्रांकपालम्भभवंनु मम देवता ॥ सर्वे पुत्राः भुवेदानुजनानापिनितिमृताः ॥ १ ॥ तस्यामृतमसाकृह्णाव्रलविष्णुमहेश्वराः ॥ वरदानं सपुष्कराष्यप्रेसाम्व स्पष्टवतां ॥ २ ॥ अशक्तास्तवरंदानं तदाशप्रालयाक्रुधा ॥ प्रमातां ममपुरा कृतयस्मान्तु तेःपुनः ॥ ३ ॥ कोट्योनिंप्रपठेथाः कुशाखेरुहपंथ्वतो ॥ अविवार्यवयं शमात्वयायत्नपतोद्भवे ॥ ४ ॥ तेनकर्मविपाके नजराक्रमान दीक्षवा ॥ अस्मोत्वशापंक्रान्ते त्वंमहानखोनाहलो भवन ॥ ५ ॥ एकंपिताः भुराःलो वब्रसाताने त्वमितिष्ठ ॥ व्रस्त्वाहि महाशापादन्योन्यपतितानक्रुधा ॥ ६ ॥ इति देववचः श्रुत्वा ब्रह्मा शंकरमब्रवीत् ॥ शिवःप्रोवाच यथा नारअहंसंसारकारक ॥ ७ ॥ त्वंतष्टिकर्त्ता विष्णुःपालको बुद्धिमन्नरः ॥ सप्रष्टव्योयथासोत्वे सुभयोः संभवेदिति ॥ ८ ॥ इति माहेश्वरं श्रुत्वा वचनं विष्णुरब्रवीत् ॥ शिवःप्रोवाच यथा नारअहंसंसारकारकः ॥ ७ ॥ त्वंसृष्टिकर्त्ता विष्णुश्च पालको बुद्धिमन्नरः ॥ सप्रष्टो

58

॥ राम: ॥
॥ ५८ ॥

यथा सोख्यमुभयोः संभवेदिति ॥ ८ ॥ इति माहेश्वरं श्रुत्वा वचनं विष्णुरब्रवीत ॥ श्रणु त्वं च महादेव भगाद्देवि गजा
नन ॥ ९ ॥ मत्कृतोत्र शरीरोग्रा स्नाने गौशापतोत्र तु ॥ भविष्यन्न मया मांसं कल्पियामि कलेवरं ॥ १० ॥ शिलां भवि
ष्यति यदा तन्मे रोमजाः संभवाः ॥ पाषाणानां नगीनाः कीटा वज्रास्याः प्रभविष्यथ ॥ ११ ॥ अद्येव गण्डकी पुण्या
गंगातुल्या महानदी ॥ सर्वे देवर्षिनिकरा भुक्तिमुक्तिप्रदायिनी ॥ १२ ॥ भव.चास्यां तु पाषाणा ये नदं नगीनाः सु
रा ॥ पार्थिवां शं विनासर्वे वज्रकीटा भवन्तिति ॥ १३ ॥ अतो नैव तु गण्डक्या पुत्रत्वं भवतामपि ॥ भविष्य
ति न संदेहं नश्वचिह्नं न देवतो ध्रुवं ॥ १४ ॥ वितापयेच्च यियक्षोति सापशांता ॥ नयेत्तत्र नन्दनखेचरक्षस्यापि
पूजनात ॥ १५ ॥ संतो योजायते नेपाणगण्डक्यां इमा च नाशय ॥ इति विष्णुवचः श्रुत्वा ब्रह्मा वचनमब्रवीत
॥ १६ ॥ कीदृक् पूज्याः शिला विष्णो किं चिह्नाः कस्य वल्लभा ॥ किं फलं वाधिकारी कः केन मार्गेण तद्वद
॥ १७ ॥ इति ब्रह्मवचः श्रुत्वा विष्णुर्वचनमब्रवीत ॥ त्वीयवर्णा शिला पूज्या ब्राह्मणैः सुखप्रये
॥ १८ ॥ स्निग्धा शिला मंत्रसिद्धिः स्त्रक्ष्माः सिद्धिकरोति हि ॥ मेचका कीर्तिदा धौम्रा गारवमायशोहरा
॥ १९ ॥ पाण्डुरा पापदृशा मनीयति नापापधीकरा ॥ पीता पुत्रफलं दद्यात् दलवर्णा सुतान् हरेत ॥ २० ॥
नीला संदिशते लक्ष्मीं धूम्रा भाहरते मतिं ॥ रोगप्रदा रक्तवर्णा सिंहलाभामता क्वति ॥ २१ ॥ दारिद्र्यकारिणी व
क्रा समा सर्वार्थस्याधिका ॥ स्थूला निर्हंति वैवायुः सूक्ष्मा स्वल्पमतिं हरेत ॥ २२ ॥ पूजाफले लांछित न
यानिःफलं लांछनं विना ॥ कपिला छिन्नवैकल्पं नेत्ररोगं च कर्बुरा ॥ २३ ॥ भग्ना भंगकरीतेया बहुचक्रा
प यानता ॥ लक्षणानां नरहीना चैदेकचक्रा वियोगता ॥ २४ ॥ बृहन्मुखी कलत्रघ्नी बृहच्चक्रा सुतान् रह

॥ मे·नं· ॥
॥ ५९ ॥

संलग्नचक्रात्वसु विवद्धचक्रा महागदं ॥ २५ ॥ भग्नचक्रा मुदारिद्र्यं सर्वनाशं त्वधोमुखी ॥ ऊर्ध्वादिके
व्यालमुखी विषमा विविधापरं ॥ २६ ॥ विकृतावर्णनापिश्च विज्ञातान्कृन्तने बहूर्वेशछेदो गृहस्था-
नां नारसिंहाड्जायते ॥ २७ ॥ रेखावर्णं तु दुःखदात्री । यथा सूक्ष्मा तथा सुखं ॥ यथा च क्षरा तथा लक्ष्मी
मोक्षौ पेदानतेः भ्रमण ॥ २८ ॥ लक्ष्मीनृसिंहः स विज्ञेयो यत्र पद्मं सचक्रके ॥ केवला च वनमालावान्गृहस्थानाम-
भीष्टदः ॥ २९ ॥ वासुदेवः स विज्ञेयो यो द्वारे चक्रयुग्मकं ॥ निरंतरं समं चापि स्पष्टो नः पापनाशनः ॥ ३०
संकर्षणः स विज्ञेयः वाकाश्या च्चक्रयुग्मकं ॥ संलग्ने पूर्वभागस्थं महड्कः सशोभनः ॥ ३१ ॥ प्रद्युम्नः स्
क्ष्मचक्रः स्याच्छिद्रं दीर्घं विचित्रितं ॥ सुषिरांतर्वर्तुछिद्रे पीनं इष्टप्रदायकं ॥ ३२ ॥ अनिरुद्धस्तु नीला-
भो वर्तुलस्तथातिशोभनः ॥ सेवाद्वये तनद्यारिवृष्टपद्मेन लांछितं ॥ ३३ ॥ केशवः स तु विज्ञेयः एकं वा
द्वयमेव वा ॥ शृंगापश्चात्तु चक्रं स्याद्गजः कोणः सभाग्यकृत ॥ ३४ ॥ नारायणः श्यामवर्णो
नाभौ चक्रं तथोन्नतं ॥ दीर्घरेखासमायुक्तं दक्षिणो सुषिरं पृथु ॥ ३५ ॥ हरित्पाशिला सा
स्याद्यस्याः कुंकुमरवं भवेत् ॥ हरिवद्दृश्यते द्वारं भुक्तिमुक्तिप्रदा तु सा ॥ ३६ ॥ परमेष्ठी
सः विज्ञेयः पद्मचक्रापिनमुयः ॥ विल्वाकृतिश्चाभ्रस्नाभः पृष्ठे च सुषिरं महत् ॥
३७ ॥ विष्णुसुहृल्लवर्णः स्यान्मध्यले चक्रे सुशोभनः ॥ द्वारोपरि तथा रेखा दृश्यते म(

॥ राम· ॥
॥ ५९ ॥

59

ध्यदेशगं ॥ ३८ ॥ नरसिंहस्तु कपिला पृथुचक्रो बृहन्मुखः ॥ त्रयो वा पंच वा तत्र बिंदवो गह्वरगो नसन ॥ ३९ ॥ कपिलो नर
सिंहस्तु गण्डलाक्षाग्निभो भवेत् ॥ स्थूलचक्रद्वयं मध्ये द्वारे रेखा सुशोभना ॥ ४० ॥ मस्तानसिंहो विज्ञेयः पूर्वोक्तं लक्षणोपेत
रेखाश्च केसराकारा मुखं दीर्घं भयानकं ॥ ४१ ॥ लक्ष्मीनृसिंहो विज्ञेयश्चनुश्चक्रस्त्रिबिंदुकः ॥ पूर्वोक्तलक्षणोपेतो व
नमालाविराजितः ॥ ४२ ॥ वाराहोसौ शक्तिलिंगे चक्रे च विषमे तथा ॥ इंद्रनीलनिभः स्थूलस्त्रिरेखालांछितो भवेत्
४३ ॥ पृथ्वीवाराहस्त्रीलाया वराहाकृतिः शिला ॥ आभुग्ना चक्ररेखे कानन राज्यप्रदायिका ॥ ४४ ॥ मत्स्याख्या सा
शिला ज्ञेया बिंदुत्रयविभूषिता ॥ कांश्याभा वा स्वर्णनिभा दीर्घा साभुक्तिमुक्तिदा ॥ ४५ ॥ कूर्माख्या तु शिला एवैव
र्तुला चोन्नता भवेत् ॥ हरितं वर्णमाधत्ते कौस्तुभेनैव चिह्निता ॥ ४६ ॥ शिला कूर्मः स विज्ञेयः कूर्माकारस्तयो भ
वेत ॥ चक्रांकितास्तथा दृष्टा पूजिता सा पदप्रदा ॥ ४७ ॥ हयग्रीवोङ्कुशाकारो रेखा चक्रसमीपगा ॥ बहुविंदुस
मायुक्तं पद्मं नीरदनीलकं ॥ ४८ ॥ ज्ञेयः सौम्यहयग्रीवो हयग्रीवासमा शिला ॥ दीर्घचांरेखयाप्यंकुशाकारेखा वा ना
दर्शी भवेत् ॥ ४९ ॥ हयशीर्षः स विज्ञेयो मुखं यस्य हयाकृति ॥ पद्माकृतिर्भवेद्वापि साक्षमालं शिरस्तथा ॥ ५० ॥ वैकु
ण्ठस्तिलवर्णाभश्चक्रमेकं तथाध्वजे ॥ द्वारोपरि तथा रेखा पद्माकारा सुशोभना ॥ ५१ ॥ श्रीधरस्तु तथा देव चिह्नि
तो वनमालया ॥ कदंबकुसुमाकारो रेखापंचकभूषितः ॥ ५२ ॥ वामनः स तु विज्ञेयो योऽतिह्रस्वश्च वर्तुलः ॥ अ
तसीकुसुमप्रख्यो बिंदुनोपरि शोभितः ॥ ५३ ॥ दधिवामननामा तु दूर्वाभश्चक्रसंयुतः ॥ मताद्युतिरतिह्रस्वः

॥ मे.तं ॥
॥ ६० ॥

सुपिक्षक्षेमदायकः ॥ ५४ ॥ सुदर्शनस्तथा देवः श्यामवर्णो महाद्युतिः ॥ वामपार्श्वे गदा चक्रे रेखैकैव तु दक्षिणा ॥
५५ ॥ सहस्रार्जुननामासौ नानारेखामयो भवेत् ॥ चक्राकारा यत्र पंक्तेः स्मृन्हृड्व्यदायक ॥ ५६ ॥ स्थूलतद
मोदरो यत्र मध्ये चक्रं प्रतिष्ठितं ॥ दूर्वाभं हारिलं कीर्णः पीताम्बरो धनप्रद ॥ ५७ ॥ राधादामोदरो ज्ञेयद्रु दीर्घ
श्चक्रमाश्रितं ॥ नातिदीर्घं सुवर्णं मध्ये लंबारेखा सभोगदः ॥ ५८ ॥ दामोदरः सविज्ञेयो यश्चक्रद्वयलांछितं सू
क्ष्मं भवेच्च विवरं पूजितः सुखदः सदा ॥ ५९ ॥ अनंतो बहुवर्णः स्यान्नागभोगेन चिह्नितः ॥ अनेकचक्रसंमिश्र
सर्वकामफलप्रदः ॥ ६० ॥ पुरुषोत्तमनामासौ यस्य दिक्षु विदिक्षु च ॥ कुंडलास्यास्यानि दृश्यंते पुरुषार्थफल
प्रदः ॥ ६१ ॥ योगेश्वरः सविज्ञेयो लिंगं यस्य शिरोगतं ॥ ब्रह्महत्यादि पापानां नाशको योगसिद्धिदः ॥ ६२ ॥ पद्म
नाभस्तथा रक्तः पंकजछत्रसंयुतः ॥ तलस्या पूजिते नित्यं दरिद्रस्त्री धरो भवेत् ॥ ६३ ॥ रक्तश्यामो हिरण्य
स्पष्टेऽभः स्फटिकोपमः ॥ अथवा नायमे नानाखर्गरेखाभिरन्वितः ॥ ६४ ॥ गरुडः सविज्ञेयो मत्स्येप
क्षद्वयान्वितः ॥ सुदीर्घा दृश्यते रेखास सर्पविषनाशक ॥ ६५ ॥ जनार्दनः सविज्ञेयः केवलातिस्फुटानिव
यस्योदरे तु वत्ताश्चक्राणि पिनन्नप्रिकृत ॥ ६६ ॥ लक्ष्मीनारायणो ज्ञेयो वनमालांकितोदरः ॥ स्थूलश्च वा
रश्चतुश्चक्रो भुक्तिमुक्तिप्रदायकः ॥ ६७ ॥ हृषीकेशः सविज्ञेयो योऽर्द्धचंद्राकृतिर्भवेत् ॥ नमस्पर्शेन लभे
त्स्वर्गं विषपांशुसमो हि तात ॥ ६८ ॥ लक्ष्मीनरहरिर्ज्ञेयः कृष्णवर्णः सबिंदुकः ॥ वामपार्श्वे समे चक्रे रह

60
॥ रामः ॥
॥ ६० ॥

ष्वापीष्टदायकः ॥ ६९ ॥ त्रिविक्रमस्तु विज्ञेयः श्यामवर्णो महाद्युतिः ॥ वामपार्श्वे चक्रयुग्ममेकारेखान्तु दक्षिणे ॥ ७०
कृष्णो ज्ञेयः शिला कृष्णा सचक्रा वापि चक्रिका । प्रदक्षिणावर्त्तकृष्णो भेदा इमे प्रोक्ता अत्रैवावाहयेद्धरिं ॥ विसर्जये
त्तु पूजान्ते प्रतिष्ठां नात्र कारयेत् ॥ ७३ ॥ शालिग्रामास्वरूपाः पूज्याः स्वयम्भुद्धिन्नयंनति । असमानैव पूज्येते एकः पुन्य
तमो मतः ॥ ७४ ॥ शिलां द्वादशयोनिस्थं भक्त्या संपूजयेन्नरः ॥ दिने दिने शर्म्मवृद्धिः पापनाशश्च जायते ॥ ७५ ॥ शालग्रा
मशतं यस्तु पञ्चाशत्संपूजयेन्नरः ॥ ज्ञानं दिनात्रियस्तेन कृष्णकामः स सिद्ध्यति ॥ ७६ ॥ शालग्रामा ममस्वरूपाः भ्र
ण्यन्ते पानुलक्षणाः ॥ यस्सेवनाद्भवेदिष्टपितृलोके परत्र च ॥ ७७ ॥ शिलनाभः सविज्ञेयः सालंकाकारनागमाः
स्वयंभुलिंगाकृतिमान्सर्वसिद्धिविधायकः ॥ ७८ ॥ त्रियंवकः सविज्ञेयो येविंडुत्रयभूषितः ॥ भूलाकारान्तथा
रेखा गलपुंस्त्वप्रदायकः ॥ ७९ ॥ धूर्जटिः सतु विज्ञेयो यत्र रेखा जटासमाः ॥ निश्रोयत्र वृद्धरूपे तेसोर्चितो ज्ञान
दायकः ॥ ८० ॥ शंभुस्तपाण्डुरो ज्ञेयो विंडुः कृष्णस्तु मस्तके ॥ विल्वपत्रमालातेजस्वी पूजितः स्त्रीवशंकरः ॥ ८१
ईश्वरः सतु विज्ञेयो रेखोविंडुस्तु मस्तके ॥ एकचक्रो हि चक्रोताभ्यंनरेषुभागो वरः ॥ ८२ ॥ मृत्युंजयः सवि
ज्ञेयः स्वल्पमृत्युविनाशकः ॥ अधश्चक्रं नहर्दुं वध्वे तारेखा त्रिशूलमानं ॥ ८३ ॥ चंडेश्वरनामा मासार्द्धचं
डाकृतिस्तके ॥ मध्ये चक्रद्वयं तस्य सेवनाद्रोगनाशनं ॥ ८४ ॥ रुद्रः स एव विज्ञेयः कपिलो मूर्द्धिलक्षितः
चक्रमध्ये भवेद्रेखा मारयेद्विषसंनति ॥ ८५ ॥ शालग्रामान्तथो वक्ष्ये शाक्तिकीटसमुद्भवान् । येषां पूजनतो
देवी भवानी सुप्रसीदति ॥ ८६ ॥ श्रीविद्यासामले चक्रमूर्द्धे चक्रं प्रदृश्यते ॥ वाह्ये घंटांकितो मध्ये शांतिस्वरूपा

माक्षिले हृदा ॥ ८७ ॥ महाकालीनु माहेयायां त्रिविह्नसमन्विता ॥ सूक्ष्मास्थूला विपिद्दा च वाममार्गेण पूजयेत् ॥ ८८ ॥
वाराहीं नु वराहास्य चिन्हितांनः सटान्विता ॥ स्नापिता वन्निरक्तैः मामदर्थभक्षयेत्तलं ॥ ८९ ॥ द्विद्विडाद्याः सर्वशिला
त्रिकोणोनां किताश्वपा । यद्युधा कृत्तिश्चो हुंनां देवीं तत्र निर्दिशेत् ॥ ९० ॥ देवीशिला सचक्रा या दक्षमार्गेण
नां यजेत् ॥ सार्चिता वाममार्गेण लोकद्वयशुभावहा ॥ ९१ ॥ या चक्ररहिता देवी शिलानीवामतोर्चयेत् ॥ स
र्वाः कार्यो न विप्राणां नगवांक्षोभकृढवेत् ॥ ९२ ॥ सौरीश्च शिला उर्द्धमैव प्रायः कलियुगे सुराः ॥ स्फाटिकाश्मावे
ला नु धर्मप्रकाशिमुंचति ॥ ९३ ॥ मूलेत्वोर्द्धस्थितेवर्ण्विसा विषिका प्रवर्तणं ॥ कूर्मनेत्रापथोपिष्याक्रुनोस्यांकु
ष्टकारकः ॥ ९४ ॥ गणेशः सर्वाविद्धेयो यः स्वच्छताङ्कितो भवेत् ॥ अराडाकारशिलावापि गजाननसमापि
वा ॥ ९५ ॥ यस्यामध्ये महत्चक्रं स्वस्थचक्रांच युद्दिशि ॥ साशिलानस्यदिकास्यसेव्या नष्टिशिराज्यदा ॥ ९६ ॥
अर्द्धचंद्राकृतिर्यत्र हस्यनेशाकलढयं ॥ साम्बंडशिला ज्ञेय उक्ता भोमशिला यता ॥ ९७ ॥ वारणाकारेणचिह्ने
नज्ञेया बुधशिला सुराः ॥ दीर्घा वज्ररेखाणयुक्ता गारुडिशिलामता ॥ ९८ ॥ पंचकोणानुभक्रस्य वा या काणश्रि
नेर्मता ॥ स्वरूपां वाराञ्जराहेन्मान्कोनोम्मष्ठजनरूपिणी ॥ ९९ ॥ प्राप्ते कलियुगे घोरे वामाचारविधिक्रिते भ
क्ष्याभक्ष्यविचारादिरहितेस्मिन्हसंकुले ॥ १०० ॥ कामक्रोधादिषिर्व्याप्ते जनेह्रीमिश्रीतेर्जितं ॥ काशिष्यः का
र्मत्रः कजपः कवसिद्धयः ॥ १ ॥ अथुनाहं कलौ येनेत्य जेद्विष्णुशिलामहीं ॥ नदर्शजान्दृशीनोयंतदर्शोद
ननाशिला ॥ २ ॥ जपएव कलौ श्रेयान्नहाणालिग्राम्यां चैतं तथा ॥ सूर्याघदानं समये दानं दिपवतः परं ॥ ३

61

आवाहनादिकं कुर्यान्मूर्त्यादौ नवधा क्रमात् ॥ आदावावाहनं कार्यं त्रिर्जप्त्वा मूलमंत्रकं ॥ ४ ॥ स्वलोकान्मूलरूपे-
णा देवता आगत्य मूर्त्तिषु ॥ स्थितं एवं भावयित्वा सुमुद्रावर्त्तनासुधी ॥ ५ ॥ स्थापनीयं ततः स्वस्थानान्नासिका-
रंध्रनिर्गतं ॥ करे पुष्पांजलौ स्थाप्य तां दद्याद्देवमूर्द्धनि ॥ ६ ॥ देवस्य तेजसन्मूर्त्तौ आवाहिन्याख्यमुद्रया । स्था-
पयेद्धृदयन्मूलमेतदावाहनं मतं ॥ ७ ॥ ततः संस्थापनं कुर्यादिहातिष्ठेति ष्ठ च । मूलान्ते देवतानाम तस्यान्ते च
पठेदिति ॥ ८ ॥ आस्थापनीयमुद्रां च दर्शयित्वा विभावयेत् । जातः स्थिरो देव इति पश्चात्संप्रार्थयेदिति ॥ ९
देवेश भक्तिसुलभ सर्वावरणसंयुत ॥ यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरो भव ॥ १० ॥ एवं संप्रार्थ्य देवे-
शं निधापनमाचरेत् । मूलमंत्रं समुच्चार्य्य सन्निध्यं तां च देवतां ॥ ११ ॥ इह त्वं संनिधेहीति तत्काले स्वस्वस-
न्निधौ ॥ स्थितं देवं तोषयेच्च सन्निधापनमुद्रया ॥ १२ ॥ सन्निरोधं ततः कुर्यान्मूलमुच्चार्य देवतां । संरुध्यं तां
समुच्चार्य्य सन्निरुद्धो भवेति च ॥ १३ ॥ हि सद्गरे कृपापूर्णां भक्तिभावनिरोधितां । प्रतिमायां स्थिरीजातां दे-
वतापिति चिंतयेत् ॥ १४ ॥ संमुखीकरणं कुर्यान्मूलमुच्चार्य देवतां । संमुख्यं तां च देवस्य पश्चात्संमुखो भव इत्य-
पि ॥ १५ ॥ ध्यायेत्संमुखं देवं सुप्रसन्नाननाम्बुजं ॥ संमुखीकरणीमुद्रां दर्शयेदिति तन्मतं ॥ १६ ॥ ततो-
वगुण्ठनं कुर्यान्मूलमुच्चार्य देवतां । संरुध्यं तामवगुण्ठितो भवेति प्रदर्शयेत् ॥ १७ ॥ अवगुण्ठनमुद्रां च दर्श-
येद्विं तथेदिति । मन्त्रासंमोहितं देवं विस्मयोत्फुल्ललोचनं ॥ १८ ॥ सकलीकरणं चैतद्देवस्य तस्यादिषु

षडंगमंत्रान्विन्यस्य मूलमुच्चार्य देवतां ॥ १९ ॥ संबुध्यंतां च सकली कृतो भव वदेत्ततः ॥ ध्यायेदंगिनि देवेषु प्रतिष्ठा
अंगदेवताः ॥ २० ॥ यस्माडित्स्वभावानां यदधिष्ठं प्रयोजनं ॥ अंगानामंगिनालाद्धि सकलीकरणाद्भवेत् ॥ २१
अमृतीकरणं वक्ष्ये पीठसंस्थाप्य देवतां ॥ वध्वा सप्यार्थ्यं तु मुद्रां देवमूर्द्धि प्रवर्षणां ॥ २२ ॥ जायते चामृतस्थे
ति ध्यायत्तद्धोदके तच ॥ त्रिसिंचेन्मूलमंत्रेण दीपिनी मंत्रतस्त्रिधा ॥ २३ ॥ अकारादिक्षकारांतमातृकाभिर्वि
धापुनः ॥ वाग्भवं वदयुग्मं च वाग्वादिनि च वाग्भवं ॥ २४ ॥ ऐं क्लिन्ने क्लेदिनि क्लेदय महाक्षोभमपि स्यपि ॥ कुरुयुग्मं
कामबीजं सौः मोक्षं कुरु युग्मकं ॥ २५ ॥ प्रासादश्च परा प्रासादः सप्रविंशादक्षरः ॥ दीपनी मनुराख्यातो देवते ओ
पिष्टद्धिकृतं ॥ २६ ॥ मूलसंबोधमांते च देवतामृतीकृतः ॥ भवेति च वदेदित्यमृतीकरणं स्मृतं ॥ २७ ॥ पर
मीकरणं वक्ष्ये महामुद्रां च बंधयेत् ॥ उच्चार्य मूलदेवं च पूर्वं च स्वरमामृषी ॥ २८ ॥ कृतो भवेति च प्रोक्ता
ध्यायेद्देवस्य मस्तके ॥ परमामृतनहृष्टिं च देवस्य हृदयं स्पृशन् ॥ २९ ॥ कुर्यात्प्राणप्रतिष्ठां च समयस्थानेव देत
या ॥ देवतानामहोत्संतु सर्वतस्मात्तदेवहि ॥ ३० ॥ तत्र देवतकल्पोक्तान्मोमुद्राः प्रदर्शयेत् ॥ मुद्रां च रूप
लाभायां देहवार्ताणवात्मनः ॥ ३१ ॥ या अर्घ्यं यं स्वयं स्नेतमुद्राणाः द्राक्रयो मताः ॥ मोदयंति ग्रहादिभ्यः
पादौ घ्रं द्रावयंति च ॥ ३२ ॥ मोदनं द्रावणं यस्मादतो मुद्राः प्रकीर्तिताः ॥ ततः संपूजयेद्देवं ह्यात्मालभ्योपचा
रकैः ॥ ३३ ॥ तत्राद्यैः पदजंतं कार्यः षोडशैरुपचारकैः ॥ आसनं स्वागतं चार्घ्यं पाद्यमाचमनीयकं ॥ ३४ ॥ मधुप
र्काप्याचमनं स्नानं वासमलंकृतिः ॥ गंधपुष्पाणि धूपश्च दीपनैवेद्यवंदना ॥ ३५ ॥ प्रयोजयेद्दर्शनायासुप

62

चारांस्तु षोडश॥ दशोपचारमथाप्यां स्मागृह्यस्योर्विधीयते ॥ ३६ ॥ अर्घ्यं पात्रं तथाचामो मधुपर्कस्तथा च मः॥ गंधाद
योनिवेद्यांताडपचारा दशस्मृता ॥ ३७ ॥ गंधादयो निवेद्यांता पूजा पंचोपचारिका॥ अग्रहस्त्वे गृह्यस्योर्वा कर्तव्या
कार्यं तत्परैः॥ ३८ ॥ आदौ कुर्याद्वैदिकस्तु वेदमंत्रेण पूजनं॥ ततश्च तांत्रिकैर्मंत्रैर्वा मीमूलमन्त्रेन तत्र तः॥ ३९ ॥ ऊं हं हं
हं इदमिदमिदं गृहाण ठद्वयं॥ योऽयं सर्वोपचारेषु मंत्रः पंचादशाक्षरः॥ ४० ॥ पठेद्वा वैदिकं स्तोत्रं तेन मंत्रेण वैदिकं
ः॥ सर्वत्र वह्निजायायाः स्थाने शूद्रो नमः पठेत ॥ ४१ ॥ देवस्य वामभागे तु दद्यान्मूलेन वासनं॥ पौष्पं दारुमयं वा
स्त्रं चार्मकौशं वस्त्रजं ॥ ४२ ॥ पौष्पं तु पुष्पादिरचितं कुशसूत्रादिसंयुतं॥ नानावर्णं तु गंधैश्च कोमलं सर्वकाम
दं॥ ४३ ॥ यान्ययानि निर्मितानि पुष्पाणि युक्तानि तैः कृतं॥ केवलैरासनं हंति साधकस्य मनोरथात्॥ ४४ ॥ यत्त
दारुसंभूतं तत्वैल्वं वा चंदनोद्भवं॥ गांभार्यां वा शिंशपो वा श्रीपर्णीविनिर्मितं प्रदं॥ ४५ ॥ सकाष्ठकक्षीरवृक्षतं तार
सारविवर्जितं॥ चैत्यश्मशानसंभूतं वर्जयेत्तु विभीतकं॥ ४६ ॥ रोमजं वाल्कलं कौशजातं कार्पाससंभवं॥ वा
स्त्रं चतुर्विधं श्रेष्ठं पूर्वं पूर्वं समुदाहृतं॥ ४७ ॥ सिंहव्याघ्रतरक्षूणां मृगाणां महिषस्य च॥ गजानां मानुषाणां च कृ
ष्णसारस्य चर्मणां॥ ४८ ॥ आसनं निर्मितं श्रेष्ठं निषिद्धं खरकुक्कुरं॥ शृगालस्य वृकस्यापि गोः शशस्य कपे
स्तथा॥ ४९ ॥ कुशः काशः शरो गुंथो यवो दूर्वाश्च वल्वजाः॥ गोकेशमुंजौ कुंदरश्च पूर्वाभावे परः परः॥ ५० ॥ योग
पीठस्य सदृशामेतेषामासनं स्मृतं॥ पूर्वं पूर्वं श्रेष्ठतमं कौशं दशविधं स्मृतं॥ ५१ ॥ स्वर्णताम्रजसद्वंगानां

नुपरंपरं ॥ हीनेनिषिद्धेलोहंचकांस्यंसीसंचपित्तलं ॥ ५२ ॥ सांगंसावरणांदेवपूजार्थमिहचागतं । इतिध्यात्वात
मूलांतेस्वागतंपरिकीर्तयेत् ॥ ५३ ॥ ततोर्घ्यंमूर्ध्निदद्याद्वैकालोस्यत्रिविधोमतः । स्वागतायनतथाचापांस्नात
मासनमायव ॥ ५४ ॥ पूजांतेगंधकामायदेवाचार्घ्यंप्रदापयेत् ॥ अर्घ्यद्रव्ययुतैस्तोयैरुपचारमंत्रंपठन्
५५ ॥ स्नागतेस्नानकालेचनैवेद्योपक्रमेपिच । त्रिविधःपाद्यकालःस्यात्पाद्यंस्यात्पादधावने ॥ ५६ ॥ सुगंध
मृत्तिकाभिर्वागंधपिष्टान्तकैरपि ॥ सम्यक्क्षालनपूर्वंतुशीतैर्वोष्णजलैर्भवेत् ॥ ५७ ॥ पाद्येचमधुपर्केचस्ना
नेवस्त्रोपवीतयोः ॥ भोजनेचाचमन्युक्तंतोयैःशोधप्रकीर्तितः ॥ ५८ ॥ क्षौद्रंकृत्वाकांस्यपात्रेदद्याद्देवमुखां
बुजे ॥ दिवसेदधिसंयुक्तमुपचारमंत्रंपठन् ॥ ५९ ॥ जातीफललवंगैलाचंडकंकोलपूर्णयुक् ॥ पुनराचमनी
यार्थंतोयंदेवमुखेर्पयेत् ॥ ६० ॥ सुगंधतैलैरभ्यज्यसुगंधामलकादिभिः । उद्वर्तनंविधायाथस्नापयेदुष्ण
वारिणा ॥ ६१ ॥ गंधोदकैश्चमूलेनयथाशक्त्याभिषेचयेत् ॥ क्षीरदध्याज्यमधुभिःखण्डेनचपृथक्पृथक् ॥ ६२
नारिकेरोदकेनापितथातालफलांबुना ॥ गंधद्रव्यैश्चकुसुमैस्तथागंधोदकेनच ॥ ६३ ॥ सेक्षवेनोदकेना
पिसमकर्पूरादिगंधिना ॥ कदलीपनसाम्रोत्थरसेनापिसुगंधिना ॥ ६४ ॥ शतंसहस्रमयुतंशक्त्यावाप्यभि
षेचयेत् ॥ शांखेसंपूर्यतेनैवस्नापयेत्समनस्यधीः ॥ ६५ ॥ सर्वेषांप्रीतिदःशांखोनसूर्यस्यकदाचन । पंचामृ
तैस्तीर्थतोयैरभिषिक्तःशिवोमुदे ॥ ६६ ॥ लभतेनान्यशांखोदैस्ततःशुद्धोदकेनच । स्नानंपुरुषसूक्तेनका

यंमूलेनवामिमि ॥ ६७ ॥ विस्नवेवगलामुख्यै पीतकौशेयमंवरं ॥ शिवायचसरस्वत्यैपार्श्वनाथायशुक्लकं ॥
६८ ॥ रक्तंशृङ्गारकेविघ्नानांभौमसोमनयोरपि ॥ कृष्णंभैरवकाल्यादेराद्यादेर्नीलमंवरं ॥ ६९ ॥ अछिद्रंमलसी
नंचसदशंयन्नधारितं ॥ कार्पासजंवाकौशेयंशंचकंवाविशिष्यते ॥ ७० ॥ तैलादिदूषितंनाडोगःसछिद्राद्रु
त्यजनाभवेत ॥ परकीयाञ्चदारिद्र्यंजीर्णादायुःक्षयोभवेत ॥ ७१ ॥ दग्धाछिषड्वेह्रस्पंदत्तेगात्रावलंविते
स्त्रीविच्छिन्नास्फोटकादिमलिनान्कांनिर्हानता ॥ ७२ ॥ उत्तकेशेपुत्रनाशश्चाधौतेदीनताभवेत ॥ मिथ्याभि
शापोभवतिश्लेष्मजादिदूषिते ॥ ७३ ॥ यज्ञोपवीतंदत्वाथभूषणानिसमर्पयेत ॥ ॐ तंतमोतंतन्नामम
न्त्रजनादौप्रयोजयेत ॥ ७४ ॥ नानिनानाविधानिस्युर्मुकुटादिप्रभेदतः ॥ स्त्रीपुंप्रभेदतश्चापिविविधेया
निविवक्षणैः ॥ ७५ ॥ चूर्णीघृष्टंधूमसारःसंमर्दःप्राणिसंभवः ॥ गंधःपंचविधोज्ञेयोमोददःस्वर्गवासि
नां ॥ ७६ ॥ प्रशस्तगंधयुक्तानांयत्रचूर्णानियानिच ॥ तानिगंधाख्यानिस्युश्चूर्णाख्यःप्रथमःस्मृतः ॥ ७७ ॥
घृष्टोमलयजोगंधःसरलोदेवदारुच ॥ कृष्णागरुःकलंवश्चद्वितीयोयंप्रकीर्तितः ॥ ७८ ॥ शालपत्रीरसेम
ग्गावंदनागरुकादिकात ॥ पिठीयंत्रतःकाचकूर्यानिस्रवलनीयकः ॥ ७९ ॥ कृष्णागरुश्चंदनदेवदा
रुकालीयकंवालकमंडमूलं ॥ शिलारसःकुंदरकोकिलाश्चसेवंतिकार्केतनगाहलीना ॥ ८० ॥ मृत्क
र्पटैःसंभवनकाचकूष्मांदलागुरवेमडुयलोहसूत्रैः ॥ निष्कासितोधूमरसेषुतस्यसौगंधिकैःकांवक

दोरकेण ॥ ८१ ॥ महामोदनामा सुखमोदकारी तथा भूतयक्षोरगानंदकारी ॥ ऽग्रारोचकच्छर्दिझंकापहारी
ललाटेस्थितो दृष्टिदोषापहारी ॥ ८२ ॥ यथाभागमनेकेन सुधागंगं घनारिभिः ॥ मर्दिताःसर्वतुर्थस्कसंम
ईश्वरिकीर्त्यते ॥ ८३ ॥ कस्तूरिकाया भागौ द्वौ द्वौ भागौ मृगलकस्य च ॥ नखदेलाजटामांसी त्वक्कुष्ठं च शिला
रसः ॥ ८५ ॥ चतुर्भागं वालकं च घनमष्टांतयानत्वी ॥ सुगंधकोकिलालोहवाणोराजं च वा तथा ॥ ८५
अष्टौ भागाः केसरस्य मृगयाभ्याश्च षोडश ॥ कृत्वा तु तच्च काश्मीरं कालीयमथ बोध्ययः ॥ ८६ ॥ भागाः
सेवंति कार्कस्य चंदनेन विमर्द्द्येत् । कामोदनामा संमर्हो देवतानां राजतो व कृत ॥ ८७ ॥ कस्तूरिका वो तुम
दः प्राणिनां तनितिर्यते । पंचमो यः सुगंधस्कदेवदानवतोषकृत ॥ ८८ ॥ पुष्पं पंचविधं प्रोक्तं परं चापरमे
कव ॥ उत्तमं मध्यमं हीनं तत्र षोवक्ष्यामि लक्षणं ॥ ८९ ॥ परं सुवर्णपुष्पं स्यात्तत्र यद्योगजमेव हि ॥ अत्याग
पूर्वकं देयमर्चनार्हं पुनर्भवेत् ॥ ९० ॥ अपरं राजतं पुष्पं ताम्रजं च प्रकीर्तितं । सहायोग्यं वेदमपि त्रिवर्ष
चैकवर्षके ॥ ९१ ॥ तुलसी केतकी पद्मं करवीरं च मालती । पंचैतान्युत्तमान्याहुर्मध्यमानि तथा दश ।
९२ ॥ मल्लिकाकुंदमंदारनगराजेन किंभकाः । पारिजातमशोकं च बिल्वं चंपकमेव च ॥ ९३ ॥ एतच्छित्रं सु
वर्णं च सुगंधं हीनमुच्यते । न तन्त्रे विधानेषु विहितानि समर्पयेत् ॥ ९४ ॥ नार्पयेद्दूषितं पत्रमंकोरकं फल
मिभक्षितं । अंगलग्नं समाघ्रातं म्लानं पर्युषितं तथा ॥ ९५ ॥ उग्रगंधमगंधं च कृमिकेशादिदूषितं अशुद्ध

64

पात्रघ्राणं गवा सोभिः कल्पितात्मभिः ॥ ९६ ॥ आनीतं तन्निषिद्धं स्यात्त्व्यान्हतानुतन्तस्तथा ॥ पत्रं वा यदि वा पुष्पं
फलं नेष्टमधोमुखं ॥ ९७ ॥ दुःखदं जन्समाख्यातं यथोत्पन्नं तथार्पणं ॥ विकचपद्मजात्सकौसुमं विकृतकुसुमभूष
णां ॥ ९८ ॥ अधोमुखार्पणं नैव पुष्पाञ्जलिविधौ तु तत् ॥ न पर्युषितदोषोऽस्ति जलसी बिल्वचंपके ॥ ९९ ॥ जलजेव
कुलेऽगस्त्ये मालाकारगृहेषु च ॥ केतकीकुन्दजैर्नैवं नवर्ययाक्षतैर्हरिं ॥ १०० ॥ नहूदेयायजेऽदुर्गां बिल्वपत्रैर्दि
नाकरे ॥ लेशोदत्तं तुलस्या च हृंतहीं नैव समर्चयेत् ॥ १ ॥ देवीवाम्मकमंदारावादित्ये नगारं तथा ॥ गणेशाय च
सूर्याय रक्तपुष्पमतिप्रियं ॥ २ ॥ पुष्पाभावे प्रवालैर्वा तदभावे चकोरकैः ॥ तदभावे फलैः पत्रैस्तदभावे म
राक्षरैः ॥ ३ ॥ कदलं दाडिमं कोलं जंबूर्विचामलाघकं ॥ मातुलुंगं च जंबीरं पनसं श्रेष्ठमुच्यते ॥ ४ ॥ अथप
ञ्चोपचारांस्तु कुर्यादावरणार्चने मंत्रं संपुटितैर्वर्णैर्मातृकायाः सविंदकैः ॥ ५ ॥ क्रमेणागंधपुष्पाद्यैर्दे
वस्यांगे समर्चयेत् लयोगत्वेनमान्तरांस्थानोगेभुततः परं ॥ ६ ॥ प्रथमावरणं पूज्यं तदन्ते देवतां यजेत्
पुनरावरणं चेष्टदेवतामर्चयेत्तथा ॥ ७ ॥ एवं समर्च्य सर्वोस्ताः यथोक्ता हृति देवताः ॥ केसरेषु त्रिको
णादौ हृदयादीनि पूजयेत् ॥ ८ ॥ नेत्रमग्रे दिशास्वस्त्रं ध्यातव्याश्चांगदेवताः ॥ तुषारस्फटिकश्यामनील
कृष्णारुणार्चिषः ॥ ९ ॥ वरदाभयधारिण्यः प्रधाननतनवस्त्रियः ॥ अग्नीशासुरवायव्यमध्यदिक्षु क्रमान्न
स्थिता ॥ १० ॥ देवस्य पुरतः प्राचीत्येयावरणपूजने ॥ तदादि परिवाराणां प्रादक्षिण्येन पूजनं ॥ ११ ॥ अंगमंत्रा
स्तु पूजायामोंनमोन्ताङ्गैस्तथा ॥ स्वाहांता अथ देवस्याभिमुखे ताः समास्थिता ॥ १२ ॥ ततो यजेल्लोकपा

लास्वस्वदिक्षु व्यवस्थितान् ॥ आयुधानि तदग्रे च तेषां ध्यानमथोच्यते ॥ १३ ॥ इंद्रं सुराधिपं पीतमैरावतगतं विभुं ॥ सह
स्रनेत्रं द्विभुजं पीतं वज्रधरं भजे ॥ १४ ॥ अग्निं तेजोधिपं रक्तं छागेन शक्तिकरप्रभं ॥ सुभूषणां मेषवाहं वंदे रक्तांगलो
चनं ॥ १५ ॥ यमं प्रेताधिपं कृष्णं महिषोपरिसंस्थितं ॥ कालदण्डधरं क्रूरं वृतं दूतैर्भयानकैः ॥ १६ ॥ रक्षोधिपं च नि
र्ऋतिं निशाचरसमास्थितं कृष्णाभं खड्गहस्तं च पिंगलं इप श्वकर्त्तकं ॥ १७ ॥ मकरे संस्थितं विद्युत्रिभं पाशकरांबुजं
शुभ्राभं कुंडिलं वन्दे वरुणं यादसां पतिं ॥ १८ ॥ वायुं प्राणाधिपं धूम्रं रक्तांकुशकरांबरं ॥ वाजपृष्ठसमारूढं धावंतं वेग
तो भजे ॥ १९ ॥ यक्षपतिं कुवेरं च भव्यं लाभं स्वर्णगदाधरं ॥ नरसिंहासनारूढं मेदुलं चित्रिणीयुतं ॥ २० ॥ विद्याधिपं नीलकण्ठ
लंधरं वृषभवाहनं ॥ त्रिनेत्रं भालचंद्रं च जटाजूटधरं सितं ॥ २१ ॥ गोरं नागाधिपं मूर्द्धि फणामण्डलभूषितं पीनो
त्तुंगवक्षसं अनंतं विश्वपं भजेत् ॥ २२ ॥ लोकाधिपं विधातारं रक्तं पद्मकरं प्रभुं ॥ हंसारूढं वेदपाठकवंनत
महं भजे ॥ २३ ॥ पुनमूलं सफवार्घ्यसंगाद्यैस्परोनिव ॥ गाणाथे नामदेव्याश्चवन्थ्यं नमस्कारयेत् ॥ २४ ॥ नमस्
सर्व्वयेऽहं च पुष्पाद्यैः साधकस्त्रिधा ॥ धूपपात्रं ततो नेत्रे गक्षालये धूजयेत्ततः ॥ २५ ॥ हस्तेन नाथवाह्रेण
घंटां संपूज्य वादयेत् ॥ धूपं दहेदगुरोश्चापि सिद्धः प्रोक्तश्च गुग्गुलः ॥ २६ ॥ सर्जदेवाम्रहेश्चापि निर्यासो देवदारुज
: शिलोः कृत्वा गन्धः शीतं भास्करस्य प्रियं मतः ॥ २७ ॥ कुराक्षे ईशांगं वृक्ष्यापि शैलेयं मलयोद्भवं ॥ नखं कुष्ठं सर्ज
रसम्मेके कांशां प्रकल्पयेत् ॥ २८ ॥ शिलारसागरुजटामांसी भागद्वयं मतं ॥ वाप्याक्षिकं सिता चाष्टौ धूपोयं श्रा

65

क्षिमोहनः ॥ २९ ॥ ह्रीमकी सर्जरसपुरमांस्यःकृभागिका । लाक्षा त्रिभागा चत्वारो भागाः शैलजमुस्तयोः ॥ ३० ॥ पंचभागं
नखं प्रोक्तं षडांगं कृष्णमुच्यते । द्वादशांशो गुडो कैशाठि प्रविष्णु दशांगकः ॥ ३१ ॥ मधुमुस्ताघृतं गंधो गुग्गुल्वगरुशैलं
जं सरलं सिल्हसिद्धार्थौ झोषदेवदशांगकः ॥ ३२ ॥ वामतस्कनथाधूपमग्रे वा न तु दक्षिणे । न धूपं विन्यसेद्धूपो नासने
न घटे तथा ॥ ३३ ॥ यथा तथाधारगतं कृत्वा तं विनिवेदयेत् । मेदोमज्जायुमांनेष्टा विलवेह्नलसंभव ॥ ३४ ॥ पूत्रायि
स्मात्स्वमंत्रेण घण्टां तन्त्रादर्वकं । दीपं दशानुशिभवेनाना वायपुरःसर ॥ ३५ ॥ तारो जगद्ध्वनिपदं मंत्रमानो त्रिरो
हिनी । एकादशाक्षरो मंत्रो घण्टापाः सर्वसिद्धिदः ॥ ३६ ॥ आवाहने र्घ्ये धूपं च पुष्पे नैवेद्यदीपयोः ॥ घण्टानादं प्रकु
र्वीत विशेषाद्धूपदीपयोः ॥ ३७ ॥ पूजाकालं विनान्यत्र कुर्याद्दस्याः प्रवादनं । तानयाव वि नादत्रा कारयेत्सिद्धि
मालसः ॥ ३८ ॥ गोसर्पिषा वा तैलेन वर्त्या वलघुगर्भया । उच्चैः प्रदर्शयेद्दीपं नचमेदाहिनाक्कचित ॥ ३९ ॥ न
मिश्रीकृत्य दद्यात्तु दीपस्नेहान् घृतादिकान् । कृत्वापि मिश्रीकृतं स्नेहं तामिस्रं नरकं व्रजेत् ॥ ४० ॥ पारावतस्यमा
कारं भ्रामयेद्धूपप्रदर्शयेत् । देवस्य सर्वावयवान् श्लोकमेवं ततः पठेत् ॥ ४१ ॥ सुपकाशो महादीपः सर्वत्र तिमि
रापहः । स वाह्याभ्यंतरे ज्योतिर्दीपोयं प्रतिगृह्यतां ॥ ४२ ॥ दक्षिणे सार्पपं दीपं तिलतैलस्य वामतः । सिता
वर्तिर्दक्षिणास्योरक्ता वर्तिश्च वामतः ॥ ४३ ॥ वृक्षे पुदीपो दातव्यो न तु भूमौ कदाचनः । कृत्वा तु पृथिवीता
पं दीपभष्मन्तु तेन नरः ॥ ४४ ॥ सतात्रतापं नरकं प्राप्नोत्येव ह्यतं समाः । नैव निर्वापयेद्दीपं लक्ष्मीनाशकरो यतः

४५ ॥ पाद्यपाद्यमनीयं च दत्वा नैवेद्यमर्थयेत् ॥ निधाय स्वर्णजे पात्रे साधारं न च मण्डले ॥ ४६ ॥ संस्थाप्य चतुरस्रे वसं
स्कुर्याच्छास्त्रमार्गतः ॥ अस्त्रमंत्रेण संप्रोक्ष्य चक्रमुद्राभिरक्षितं ॥ ४७ ॥ स्पर्शदृष्ट्यादिदोषांश्च वायुबीजेन शोषयेत् ॥ स्व
शरदक्षकराग्रेण वह्निबीजेन निर्दहेत् ॥ ४८ ॥ वंबीजेनामृतीकृत्य मूलमंत्रेण तत्पुनः ॥ स्पृशेत्कराभ्यां विविवदष्ट
धा वाभिमंत्रयेत् ॥ ४९ ॥ धेनुमुद्रां प्रदर्श्याथ गंधपुष्पैः समर्चयेत् ॥ देवमभ्यर्च्य कुर्याच्च पुष्पांजलिमनन्यधीः ॥ ५०
हेमपात्रस्थितं दिव्यं परमान्नं सुसंस्कृतं ॥ पंचधा षड्रसोपेतं गृहाण मम सिद्धये ॥ ५१ ॥ मूलमंत्रं समुच्चार्य त्वा
हां न जलमर्पयेत् ॥ कराप्पा संस्पृशन्पात्रं नैवेद्येन पोवदेत् ॥ ५२ ॥ देवस्य दक्षिणे हस्ते जलं दत्वा वदेदिदं
अमृतोपस्तरणमसि स्वाहेति भवाक्षरः ॥ ५३ ॥ दर्शये वामहस्तेन विकंचोत्पलसन्निभां ॥ दर्शयित्वा ग्रासमु
द्रां पंच प्राणाहुतीश्चरेत् ॥ ५४ ॥ कनिष्ठानामिकांगुष्ठयोगः प्राणस्य मुद्रिका ॥ तयाप्यासंगृह्य त्वा प्राणाय
स्वाहेति संवदेत् ॥ ५५ ॥ तर्जनीमध्यमांगुष्ठयोगेनापानकं वदेत् ॥ ॐ तं त्वासनमथ च व्यानाय च ततो वदेत् ॥
५६ ॥ स्वाहाथ मध्यमानामांगुष्ठयोगेन निर्वपेत् ॥ हित्वा कनिष्ठां सर्वाभिरुदानायाग्निगेहिनी ॥ ५७ ॥ सर्वा
भिस्तु समानाय स्वाहेति ग्रासमाचयेत् ॥ ततः स्वर्णादिजे पात्रे सुशोयं चेउपडपा ॥ ५८ ॥ अमृतीकृत्य
देवाय देयं मंत्रमिमं पठेत् ॥ नमस्ते देवदेवेश सर्वतृप्तिकरं वरं ॥ ५९ ॥ स्रस्मानिवदितं भद्रे प्रकृतिस्थं
सुशीतलं ॥ परमानंदसंपूर्णं गृहाण जलमुत्तमं ॥ ६० ॥ ॐ स्रैं वं देवतावामे जलपात्रं निवेशयेत् त्रिभि

66

वरौं:प्रदानयं देवार्थपाकभोजने ॥ ६१ ॥ घृतपक्वं इन्धसिक्तं साधितं केवलाग्निनां । युक्तं वैश्वदेवपंक्ते
नन कुण्डस्य प्रशस्यते ॥ ६२ ॥ मनःपुष्पांजलिं दद्याद दक्षमंत्रेण वर्धनं । दिशां कृत्वा जवनिकां देवस्य परि
तो मस्येत ॥ ६३ ॥ अमृतात्मकं नैवेद्यं नमइमुद्धरेत्ततः । धेनुमुद्रां प्रदर्श्याथ भजानां देवतांस्मरेत ॥ ६४ ॥
अष्टोत्तरं शतं जप्त्वा मूलमंत्रं ददेज्जले । नैवेद्यानंत्यावपनं दत्वा होमं विधिं चरेत ॥ ६५ ॥ पूर्ववत्संस्कृ
तेवह्नौ देवमावाह्य मंत्रवित ॥ संपूज्य मूलमंत्रेणा पंचविंशतिमाहुति ॥ ६६ ॥ हुनेदाज्येन हविषा ति
लैर्वा घाद्यैः शुभैः ॥ नारिकेलैः सितपिष्टैर्वा केवलैर्वाथ पुष्पकैः ॥ ६७ ॥ अंगावरणदेवानामेकैकामाहुतिं
हुनेत ॥ उद्वास्य देवं वह्निं च पूजास्थाने ततः ततः ॥ ६८ ॥ उपविश्यासने मंत्री दद्याद्भूतबलिं ततः । ईशा
नेमण्डलं कृत्वा साधारं तत्र निःक्षिपेत ॥ ६९ ॥ अन्नं व्यंजनं ततो पात्रं पात्रपुष्पादिपूरितं ॥ तत्र भूतानि
संपूज्य ततस्तेभ्यो बलिं हरेत ॥ ७० ॥ ये रौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः ॥ योगिन्यो प्युग्ररूपाश्च
गणानामाधिपाश्च ये ॥ ७१ ॥ भूचराः खेचराश्चैव ये निघ्नंस्थं न दिक्षराः ॥ सर्वे ते प्रीतमनसो भूताग्रहृं
त्विमं बलिं ॥ ७२ ॥ वामहस्तेन तत्पात्रे जलधारां समर्पयेत ॥ पुष्पांजलिं समादाय भूतानि प्रार्थयेद्
दिति ॥ ७३ ॥ भूतानि यानि ह्यवसंति भूतले बलिं गृहीत्वा विधिवत्प्रयुक्तं ॥ संतोषमासाद्य तु जंतु मवैस
मंत्र नान्यत्र न मोमनेभ्यः ॥ ७४ ॥ दत्वा पुष्पांजलिं नीत्वा विहिरं तु यथासुखं ॥ ॥ भूतानी।

जिवनारावमुड्याविलूनेत्रनः ॥७५॥ देवनप्रमितिश्यान्नानैवेद्यंशानसारकं ॥ सं। विंन्यरसोछिन्यागेपात्रंन
त्रण्यापयेन्मन ॥७६॥ गोमयाडिम्लदस्त्रेरानैवेद्यस्थानशोधन ॥ देवोछिष्टंगृहीत्वानुनिर्माल्यभोजिनेन
मः ॥७७॥ इत्येशान्यांविनिक्षिप्यहस्तंप्रसालयेत्ततः ॥ पुनराचमनंदद्यात्करोद्वर्त्तनमेवच ॥७८॥ मुद्र
माचमनंदत्वासुगंधैर्गंधयत्करौ ॥ ततोदद्याच्चतांबूलं विल्लवे द्वादशाङ्गके ॥७९॥ खदिरैलालवंगै
डचूर्णपराणंतमालकं ॥ जातीकोशदलत्वग्भिःकस्तूरीकेसरैर्युत ॥८०॥ पूगीफलमथाप्रोक्तंदशां
गभास्करस्यत ॥ मृगनाभिनमाल्याम्पांही। नेविघ्नेभ्वरस्यत ॥८१॥ पंचागंचर्णखदिरंयुरांपूगीफलेड
कं ॥ एलंदेव्यातातिकोशयुतंतच्चमहेशितुः ॥८२॥ ततस्तुमुकुटादीनिदद्याद्भूषांणकानिच ॥ दर्शयेच्चतथा
दर्शकल्पंयेछत्रचामरे ॥८३॥ शिरस्यारोप्यदेवस्यदूर्वासतपवित्रकं ॥ आरात्रिकंततःकुर्याद्दर्पकामार्थ
सिद्धये ॥८४॥ सौवर्णोरात्तनेकांगंवलोकनेत्रमनोहरं ॥ कुंकुमेनलिखेत्सम्यग्पट्टपर्वसुशोभनं ॥८५॥ महादीपं
कर्णिकायांवसुपत्रेष्टदीपकान् ॥ यवगोधूमपरिचितान्द्गकेरापडुंधसंयुतान् ॥८६॥ वलयांश्चितशोभाभि
:प्रोभितानंघृतपूरितान् ॥ अभिमंत्र्यततोमंत्रीरत्नेभ्चर्यानवात्तनं ॥८७॥ श्रीं ह्रीं क्लीं क्रूं मयोपाघरश्च
श्रीं ह्रीं पिलिंगमान ॥ रत्नेभ्चर्याःसंप्रदिष्टस्ततोमूलेनशयुजेत ॥८८॥ ततनत्यात्रमुद्धृपमसमकांतपूत:
तः ॥ नवशरस्त्रामपयेववधस्क्रमुंडांश्चदर्शयेत ॥८९॥ देवंप्रणम्यचततःप्राणायामपंचरेत ॥ मूलमंत्रेणाथच

र्वस्यासान्सर्वान्समाचरेत्॥ ९०॥ अष्टोत्तरसहस्रं तु नन्दद्वैत्रिशते तु वा। अष्टोत्तरं शतं वापि जपेन्मूलमनोर्दिनः
९१॥ समाप्ते तु जपे माला निदध्यान्मस्तकोपरि। अर्घ्यपात्रजलं हस्तेन गृहीत्वेदं पठेन्मनुः॥ ९२॥ गुह्यातिगुह्य
गोप्ता त्वं गृहाणास्मत्कृतं जपं॥ सिद्धिर्भवतु मे देव त्वत्प्रसादाज्जगत्पते॥ ९३॥ देवस्य दक्षिणे हस्ते तोयं द
त्त्वा समर्पयेत्॥ जपं च जपमालाञ्च स्थाप्या रहसि वेष्टितः॥ ९४॥ ततस्तवान्स्तुतिभिर्घण्टावादनपू
र्वकं॥ ब्राह्मणा वेदमन्त्राद्यैः क्षत्रियः संहितादिभिः॥ ९५॥ पौराणिकोक्तैर्वैश्यस्तु शूद्रस्तु प्राकृतादिभिः
वापि तद्रूपवासान्ते कुर्यान्मध्ये च तर्पणं॥ ९६॥ तेषां मतिस्तोहमाल्कनि स्पेतर्पणासेवने॥ कौलिकैः श्रा
द्धसहितैस्तदुच्छिष्टं तु सेवयेत्॥ ९७॥ मोहाद्वा कामतः शूद्रः श्रौतां संहितां यदि॥ पठन्नरकमाप्नोति
पितापि सहपापकृत्॥ ९८॥ यः शूद्रो बुद्धिपूर्वं तु ब्राह्मणं वाच्छादयेद्द्विजः॥ वदन्तौ डौउः रविनौ त्वौ स्पिनर्भ
वेत्पत्रनारकौ॥ ९९॥ अधिकारे मत्याणां ल्कःपतस्य मदनोपि वा॥ शूद्रस्त्रीणां यां हृदे सनि वंशश्चनिर्द्व
न॥ १००॥ अज्ञानाच्छूद्रतो वेदः श्रावितो वा द्विजन्मना॥ आज्ञापत्रं त्रयं कृत्वा तौ होभ्रुज्ञोम विध्वतः
ततोर्घ्यं पात्रमादाय मूलमुच्चार्य मन्त्रवित्॥ साधु वासाधु वा कर्म यद्यच्चरितं मया॥ २॥ तत्सर्वं भ
गवन्देव गृहाणाराधनं परं॥ इत्यर्घ्योदकपुष्पाञ्जल्या किंचिद्देवस्य दक्षिणे॥ ३॥ करे समर्पयेद्विद्वान्
हृन्नस्माराधनं ततः॥ कृत्वा प्रणामं देवेशं श्लोकैरेभिः क्षमापयेत्॥ ४॥ यदन्नं मभ्रि मात्रेणायतं पुष्पफ

लंकृतं ॥ निवेदितं च नैवेद्यं तत्कृतागातकं मया ॥ ५ ॥ आवाहनं न जानामि न जानामि विसर्जनं ॥ पूजां चैव न जाना
मि त्वं गतिः परमेश्वरं ॥ ६ ॥ कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम ॥ अन्तश्चारेण भूतानां द्रष्टा त्वं परमेश्वरः
॥ ७ ॥ नाथ योनिसहस्रेषु यासु यासु व्रजाम्यहं ॥ तासु तासु रसदा भक्तिरत्वयास्तु सदा त्वयि ॥ ८ ॥ देवो दाता च
भोक्ता च देवः सर्वमिदं जगत् ॥ देवो जयति सर्वत्र यो देवः सोहमेव हि ॥ ९ ॥ नद्यो दर्पपात्रतोयेन कुर्याद्दाराधनार्थ
तां ॥ साधु वा साधु वा कर्म यद्यदाचरितं मया ॥ १० ॥ तत्सर्वं भगवन् देव गृहाणाराधनं परं ॥ ब्रह्मार्पणस्य मन्त्र
ताकुर्याद्ब्रह्मार्पणं ततः ॥ ११ ॥ तारादतः पूर्वमिति प्राणबुद्धीति संवदेत् ॥ देहधर्माधिकारोते जाग्रत्स्वप्नसु
षुप्त्यव ॥ १२ ॥ स्थानसूक्ता मनसा वाचा कर्मणाभ्यां नहस्तकः ॥ यद्धद्भ्यादरेणोति शिश्नाय च स्मृतं उक्तं ॥
१३ ॥ उक्तं यत्त्वकृतं तत्तु सर्वं ब्रह्मार्पणं भव ॥ स्वाहेति च मंत्रोयेब दूर्वाऽर्णः समीरितः ॥ १४ ॥ उद्वासयेत्ततो दे
वं परिवारगणैः सह ॥ इति ब्ध्वांजलिं दत्वा प्रणम्य परिभावयेत् ॥ १५ ॥ देवस्यांगे विलीनं तऽस्थितं हृदवि
शेषकः ॥ तेजोरूपशिवं ध्यात्वा क्ष्मसर्वोतिभुनःभुनः ॥ १६ ॥ क्षमाप्यारोपयेत्त्वी यहृदं भोजेतु देवतां ॥ गच्छ
गच्छ परस्थानं स्वस्थानं परमेश्वर ॥ १७ ॥ यत्र ब्रह्मादयो देवा न विदुः परमं पदं ॥ विसर्ज्यानेन मंत्रेण ततः
पूरकवायुना ॥ १८ ॥ आवाहयेन्मंत्रेणानेन ध्यात्वात्मनो हृदि ॥ तिष्ठ तिष्ठ परस्थाने स्वस्थाने परमेश्वरः ॥ १९
यत्र ब्रह्मादयः सर्वे सुरास्तिष्ठंति मे हृदि ॥ इति संस्थाप्य संपूज्य स्तान्याऽनं तन्मयं स्मरेत् ॥ २० ॥ ईशान्यां मण्डलं कृ

68

र्यां द्वारपमविवर्जितं ॥ निर्माल्यभोक्तुः पूजार्थं पंचायतनपूजनं ॥ २१ ॥ कर्तव्यानि तु पंचैव ईशादामध्यमेर्चयेत् ॥
लंबोदरो गणेशस्य तेजश्चण्डो विवस्वतः ॥ २२ ॥ विष्वक्सेनो हरेः प्रोक्तश्चण्डेश्वरी महेशितुः ॥ चण्डेश्वरो भवान्याश्च
मंत्रोहं तादृशं चरेत् ॥ २३ ॥ लेह्यचोष्यान्नपानादि निर्माल्यं स्रग्विलेपनं ॥ निर्माल्यभोजिने तुभ्यं दत्तमित्थीशिवाज्ञ
या ॥ २४ ॥ इति नैवेद्यशेषं तु दत्वा तत्त्वा विसर्जयेत् ॥ अथ ह्रीं ह्रूं सर्वबीजेल्क स्वाहेति नाम तु नामतः ॥ २५ ॥ मंत्रेणाभ्यास्करा
चामछिद्रार्थं निवेदयेत् ॥ नमो विवस्वते तुभ्यं भास्वते विष्णुतेजसे ॥ २६ ॥ जगत्सवित्रे शुचये सवित्रे कर्मदायिने
नमः कृतांजलिश्चित्तं स्थिरीकृत्य पठेदिति ॥ २७ ॥ यत्तछिद्रं पछिद्रं यछिद्रं पूजने मम सर्वं तदछिद्रमस्तु भा
स्करस्य प्रसादतः ॥ २८ ॥ अर्घ्यं तोयेन च ततो गंधं पूजावशेषितं ॥ आलोक्य किंचिन्मूलेन मंत्रयेदष्टधा पुनः
२९ ॥ प्रोक्षयेत्तेन तोयेन स्वात्मानं मूलमंत्रतः ॥ निर्माल्यं मस्तके धार्यं मूलमंत्रेण मंत्रिणा ॥ ३० ॥ प्राश्यपादोद
कं पश्चान्नैवेद्यं विभजेत्ततः ॥ तद्भक्तेभ्यः स्वयं भुक्त्वा तन्मयो विहरेत्सुखं ॥ ३१ ॥ शैवस्त्वेव निर्माल्यप्रसादस्याधि
कारवान् ॥ अन्यो निरयमाप्नोति न दोषः पंचसंगमे ॥ ३२ ॥ स्वयंभूलिंगतीर्थं वा प्रमादे वापि भक्तितः ॥ अशैवा वा
थवा शैवा स्वं ते पापनाशितः ॥ ३३ ॥ भूतसंस्थापितं लिंगं पूजयेद्यानमेन वा ॥ तत्सर्वं विधि प्रासादादिमृन्निर
यमाप्नुयात् ॥ ३४ ॥ अयं पूजाविधिर्मुख्यो युष्मभ्यं संप्रकाशितः ॥ अथाल्पं संप्रवक्ष्यामि यं विना दुःखमाप्नुयात्
३५ ॥ प्रातरुत्थाय गुर्वादिस्मृत्वाशौचं समाचरेत् ॥ स्नानं संध्यां तर्पणं च वैदिकं तांत्रिकं तथा ॥ ३६ ॥ आगत्य च

गृहे पश्चात्प्राणायामत्रयं चरेत् ॥ कुर्याद्वमानकान्न्यासं तथाद्दृदृषिदैवतं ॥ ३७ ॥ तन्मंत्रस्य करांगाख्यन्यासं कृत्वा
र्घसंस्थितं ॥ मंत्रस्नाने देवतायाः पूजापंचोपचारिका ॥ ३८ ॥ चंदनोनेत्वा क्वनीनां पुष्पैरेव प्रपूजनं ॥ वैश्वदेवोत्तरं
तत्रत स्नात्रातुनिपंचकं ॥ ३९ ॥ मूले नहोमयेत्न स्नाज्ञपश्चात्पुनरशनं ॥ वैदिकाकाग्रवल्यंते पूजा चोद्दिष्टभो
जिनां ॥ ४० ॥ ततः संप्रार्थये देवं सांयं संध्यां समाचरेत् ॥ देवागारे दीपदानं प्रोक्तं संक्षेपमाह्निकं ॥ ४१ ॥ अथाप
दाह्निकं वक्ष्ये तत्स्थानदशके भवेत् ॥ मार्गेप्रवासे दुर्गे वनान्तप्राप्तौ मनोभये ॥ ४२ ॥ कारागृहेऽशुभे स्थाने नापि
व्याघ्रादिजे भये ॥ परचक्रागमे कुर्याच्छौचाद्यं च यथा तथा ॥ ४३ ॥ मंत्रस्नानादिकं किंचित्कृत्वा मानसपूजनं ॥
मनसा हृदयस्थं तं ध्यात्वा योगाख्यपीठकं ॥ ४४ ॥ तत्रैव पृथिवीमध्ये पूजां देवस्य चाचरेत् ॥ यथा पूर्वा विधिः
पूजा बहिर्देशे विधीयते ॥ ४५ ॥ तथा हृद्यपि कर्त्तव्याः सर्वालाप्रतिपत्तयः ॥ मनसा जपहोमश्च एतत्क्षिपदिवा
ह्निकं ॥ ४६ ॥ अथातो रात्रिकं वक्ष्ये नित्यं चोक्ताधिकस्य तत् ॥ यदि लंघनपर्यंतो व्याधिरात्मनि दृश्यते ॥ ४७ ॥
तदा पूजा न कर्त्तव्या स्थण्डिले प्रतिमासु च ॥ तत्स्नानं देवकाष्ठ्वा कुर्याद्धोमं यथापि वा ॥ ४८ ॥ रविमण्डलमा
लोक्य प्रतिमापथवा पुनः ॥ मूलमंत्रं समुच्चार्य दत्वा पुष्पं साक्षात्तत्पूजनेन ॥ ४९ ॥ प्रांतो व्याधिपरिस्पृष्टैर्न
स्याच्चेन्निष्ठैश्रुतः ॥ निजसामयकेवीपि स्वकर्त्तव्यं समापयेत् ॥ ५० ॥ तन्निवृत्तिः ततः स्नात्वा पूजयित्वाग्नि
देवताः ॥ गुर्वन्द्रविप्रांस्तर्पयेद्वा वाचमेतदुदारयेत् ॥ ५१ ॥ एतावत्कालविच्छिन्नपूजापुण्यप्रसादनः ॥

नद्दोषोस्तीति संप्रार्थ्य पुनः पूर्ववदाचरेत् ॥ ५२ ॥ यस्तु रोगवशाद्दोषो जातस्तत्क्षालनं चरेत् ॥ जपेन चाथ दानेन हो-
मेन ध्यानतोपि वा ॥ ५३ ॥ अथ सूतकिनो नित्यं वैदिकं तु स्मृतीरितं ॥ कृत्वा तांत्रिकपूजादि मनसैव समाचरेत्
५४ ॥ कामानार्थप्रयोगश्चेत्तदा पूर्ववदाचरेत् ॥ स्वमगेहं परित्यज्य वा पान्थारेन सूतके ॥ ५५ ॥ स्वहो दिव्याहतानपू-
र्वं कुलतो धर्मप्रागतं ॥ यः पालयेत्तमधर्मं देवतानुसमाप्यते ॥ ५६ ॥ गुरूपदिष्टं दुःकर्मभक्त्यावाप्नेकोति
यः ॥ शास्त्रमन्त्वं देवतत्त्वं नोवेत्ति स तु गुरुत्यकः ॥ ५७ ॥ ज्ञानत्वाश्चेन्नभजते गुरोर्थी तत्र जायते ॥ स्कन्दश्यामर्दितः
प्रेतलस्याद्धर्मं विवारयेत् ॥ ५८ ॥ संत्रसेन च चेद्दुग्म धूपपात्रादिसाधनं ॥ पूजोदकेन कर्त्तव्यात्तोयं चेत्रे ववि-
द्यते ॥ ५९ ॥ तदा संपूजयेद्देवं भावनाकुसुमादिभिः ॥ भाक्तिः श्रद्धा भावना च पूजानां तीव्रउच्यते ॥ ६० ॥ जडा-
नामाह्निकं वक्ष्ये तथा संक्षेपकर्मणि ॥ रत्नमाद्युपधर्मादिचतुष्कपरगोपुजं ॥ ६१ ॥ मूलमन्त्रेण षडंगा-
त्रिनेत्रैषा पूजा विधीयते ॥ सर्वेषामपि वस्तूनामलाभे भावनेवरि ॥ ६२ ॥ निर्मलेनोदकेनैव पूजयेत् । तिष्ठ-
रमानवः ॥ सामान्यतस्त्रिधा पूजा चोत्तमा मध्यमाधमा ॥ ६३ ॥ अधिकारित्वपित्राभ्यां भिद्यते ज्ञातधापु-
नः ॥ वागोपकरणोक्लृप्तैः क्रिययापाणोत्तमा मता ॥ ६४ ॥ यथालब्धैर्विनिष्पाद्याऽव्यैः पूजानुमध्यमा ॥ पत्रपु-
ष्पांबुनिष्पाद्या पूजा चाधमसंज्ञका ॥ ६५ ॥ विहिताखिलवेदोक्तैर्मन्त्रैर्लक्षिभिरकल्मषैः ॥ क्रियमाणानुया
पूजा सा नित्यकामा विमुक्तिदा ॥ ६६ ॥ राजर्षिभिस्तपोनिष्ठैर्भगवत्तत्त्ववेदिभिः ॥ या पूजा क्रियते सम्यग्रा-
जसी सात्वपुदा ॥ ६७ ॥ स्त्रीबालवृद्धमूर्खाद्यैर्भक्तैरक्षकऽपातसैः ॥ या पूजा क्रियते नित्यं तामसी सा प्रकीर्त्ति-

॥ मे॰तं॰ ॥
॥ ७० ॥

ना ॥ ६८ ॥ अशक्ये स्वल्पकामानां सिद्ध्यर्थं पूजनं हितं ॥ निष्कामानां गृहस्थानां हितं गेहे तु पूजनं ॥ ६९ ॥ कदा
चिदपि न स्यात्स्यो वेदमार्गो द्विजोत्तम ॥ वेदस्थानानां विप्रत्वं देवत्वं वापि दुर्लभम् ॥ ७० ॥ वेदः कर्तुं न नोशका
स्तंत्राणि तु युगे युगे ॥ कल्पेष्वानंभवे वैविंप्रैर्यंत्रात्राकीर्तितानि तु ॥ ७१ ॥ कलिना दोरिता विप्रास्तंत्रेत्र पथ
गामिनः ॥ कामलोभादिभिर्ग्रस्ता त्रासरणो न विदुः । नितां ॥ ७२ ॥ तत्काले तु भविष्यंति क्षीणा पुरुषपाथुरार
वे ॥ पतिष्यंती नि विज्ञाय न वै वैदिकमंत्रजेन ॥ ७३ ॥ उल्लासैरैहिकं सौख्यं पठनै । विंछुगोपनं ॥ अथा
ये ये हृता ग्रंथाख्याख्यायासे द्विजन्मनां ॥ ७४ ॥ यमुद्दिश्य कृतं तंत्रं तस्य न त्रमहृत्तना ॥ पेक्षतंत्रेतु य
प्रोक्तं तत्त्वज्ञैरंतास्तथा भवेत् ॥ ७५ ॥ इति देवाः समाख्यातो युष्मत्प्रश्नविनिर्णयः ॥ एवं विचार्य कृतं
कर्म न दुःखाय प्रवर्तते ॥ ७६ ॥ इति मत्तमायामहाकालातमते मेरुतंत्रे शिवप्रणीते आह्निकप्रका
शः पंचमः ॥ ५ ॥ २१३३ ॥ मेरौ शिवप्रणीते स्मिन्मेरुग्रणप्रकटीकृते मेरुभूते च तंत्राणां कस्मात्कृत्यवि
निर्णयः ॥ ॥ श्रीगणेशाय नमः ॥ श्रीदेव्युवाच ॥ पुरश्चरणशब्दस्य ह्यर्थं च विधिं तथा ॥ वैदिका
ः सर्वमंत्राः न सिध्यंति च यं विना ॥ १ ॥ श्रीशिव उवाच ॥ रहस्यं सर्वतंत्राणां कथयामि तवाग्रतः ॥ कल्प
र्थं सर्वतंत्रेषु यत्सारं न चागोपितं ॥ २ ॥ धर्मार्थकाममोक्षाणां साधकां मंत्र उच्यते ॥ नास्ति द्रव्येषु प्रावर्यं
मेतत्स्वकार्मितं ॥ ३ ॥ पुरश्चरणकर्माख्यं वेदादौ शांवरांतके मंत्रे यंत्रे तथा वश्ये तत्स्वकारारवीष्यते

70

॥ रामः ॥
॥ ७० ॥

11

४ ॥ जापो होमस्तर्पणं च मार्जनं विप्रभोजनं । पंचांगकर्मरूपेन दारुःकं वनमत्रनः ॥ ५ ॥ चतुरंगास्तथा त्र्यंगा द्वं
गा एकाकिनोपि च ॥ मंत्रा । सिद्धं न्निवं देभुन थातंत्रे पिशाचवरे ॥ ६ ॥ केचिन्न षडंगामात्राः स्युस्तदंगानाजपा
दिनि ॥ अघमर्षणं सूर्यार्घं जलपान् प्रणाममस्तैः ॥ ७ ॥ देवां वैयापंचमिश्रनैरेवं स्युर्दशांगकाः ॥ इतीवागात्र
थावोलिकर्मनथ्वक्रपूजनात् ॥ ८ ॥ ध्वजलिंगसमायोगन्नपाच्चवलिदानसः ॥ महावलिप्रदामाच्चपवंत्वे
कादशांगकाः ॥ ९ ॥ षोडशांगाः कौलिकानां वामकानां द्विकोन्निमाः ॥ अप्रमर्येस्परिसेनानो द्वादशांगा ह्यघो
रिणां ॥ १० ॥ सर्वपापसयं कुर्यादथवा सिद्धिवेधकृत् ॥ यावत्प्राप्थं तस्य नाशं कृत्वा कुर्यात्सुरक्षति ॥ ११ ॥
यथा प्रोक्तेन मार्गेण तत्स्यात्सिद्धिरदूरतः ॥ सर्वपापक्षयस्तत्र भवेद्वैदिककर्मणां ॥ १२ ॥ तांत्रिकानां कौलि
कानां वाणिनां नाधिकारता ॥ तस्मिन्कर्मणि तेषां तु नाधिकारोस्ति वैदिके ॥ १३ ॥ प्रकशात्वाधा।यि।भिः
कार्यागणा ह्यमोथनद्विधिः ॥ स्नातः कृतक्रियः पत्त्वासहितो दर्भसंस्तरः ॥ १४ ॥ प्राणायामस्य संकल्प पू
जयित्वा गणेश्वरं ॥ स्वगृह्योक्तविधानेन संस्थाप्याग्निं च रक्षयेत् ॥ १५ ॥ आज्यं विलाप्य तदुक्तं द्विराधारसे
ननः ॥ अग्ने नयेति सूक्तेन षडृचेन तु तेन्नतः ॥ १६ ॥ अस्मिं मंत्रे भवेत्स्यागो अग्नये इदं न मम ॥ इत्यथोनात्रवो
वक्ष्ये नात्र शास्त्राविपर्ययः ॥ १७ ॥ अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ॥ युयोध्य
स्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥ १८ ॥ प्रकर्मकाय भानवे भारं ध्येहं कं मतिकाग्नये सुपूजन

यो दैवानामिमानवाजानवष्ठं नर्विश्वानि विषनानि गानि ॥१९॥ अछा गिरो मं न थो देवयं नीरा अग्ने ये निडविराणि
मिडपमाराणः ॥ सुसंदृशं सुप्रतीकं स्ववं हव्यवाहनं रतिंमानुषाणां ॥२०॥ अग्ने त्वमस्माद्युध्योध्यमीवा अन
ग्निता अभ्यमत्व कृष्टीः ॥ पुनरस्मभ्यं सुविताय देवक्षां विश्वेभिरजरेभिर्यजत्र ॥२१॥ अग्ने त्वं पारया नव्यो
अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयो ॥२२॥ प्रकारयोम
ननाव व्यमानां देवहूतिं यथ देवयन्तः ॥ दक्षिणावाड्वाजिनी प्राच्येति हविर्भरन्त्यग्नये घृताची ॥२३॥
याजुकाष्टादशार्धेन त्वोष्टपेणानन्तोक्रमेत ॥ अगर्वीजाय पुरुषाय नमयोनि वन्धजो न ॥२४॥ अवैह्व वो वेल
वस्कन्नाराय रमायं तनमम ॥ देवदेवि त्रियं सुरुजा नदिहानि निगद्यते ॥२५॥ सहस्रशीर्षा पुरुषः सहस्राक्षः स
हस्रपात् ॥ स भूमिं विश्वतो वृत्वा अंत्यतिष्ठद्दशांगुलं ॥२६॥ पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यं ॥ उतामृत
त्वस्येशानो यदन्नेनातिरोहति ॥२७॥ एतावानस्य महिमातो ज्यायांश्च पूरुषः ॥ पादोऽस्य विश्वा भूतानि
त्रिपादस्यामृतं दिवि ॥२८॥ त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ॥ ततो विश्वं व्यक्रामत्साशनानश
शने अभि ॥२९॥ तस्माद्विराडजायत विराजो अधिपूरुषः ॥ स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥३०॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ॥ वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥३१॥ सप्तास्यासन्प
रिधयः त्रिः सप्त समिधः कृताः ॥ देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुं ॥३२॥ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जा

तमग्रतः ॥ तेन देवा अजयंत साध्या ऋषयश्च ये ॥ ३३ ॥ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं ॥ पशूंस्तांश्च
क्रे वायव्यानारण्यान्ग्राम्यांश्च ये ॥ ३४ ॥ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ॥ छंदांसि जज्ञिरे तस्मा
द्यजुस्तस्मादजायत ॥ ३५ ॥ तस्मादश्वा अजायंत ये के चोभयादतः ॥ गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजा
वयः ॥ ३६ ॥ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ॥ मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते ॥ ३७ ॥ ब्राह्म
णोस्य मुखमासीद्बाहू राजन्यः कृतः ॥ ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ ३८ ॥ चंद्रमा मनसो जा
तश्चक्षोः सूर्यो अजायत ॥ मुखादिंद्रश्चाग्निश्च प्राणाद्वायुरजायत ॥ ३९ ॥ नाभ्या आसीदंतरिक्षं ॐ
शीर्ष्णो द्यौः समवर्तत ॥ पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकांअकल्पयन् ॥ ४० ॥ वेदाहमेतं पुरुषं महांतं
आसीदंतरिक्षं ॐ शीर्ष्णो द्यौः समवर्तत ॥ पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकांअकल्पयन् ॥ आदित्यवर्णं
तमसस्परस्तात् ॥ सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते ॥ ४१ ॥ धाता पुरस्ताद्यमुदा
जहार शक्रः प्रविद्वान्प्रदिशश्चतस्रः ॥ तमेवं विद्वानमृत इह भवति नान्यः पंथा अयनाय विद्यते ॥ ४२ ॥ य
ज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथमान्यासन् ॥ ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति दे
वाः ॥ ४३ ॥ अग्ने संवे निस्वक्केन वा गिर्णान्युचक्केन च ॥ उते तत्र त्रिष्टुभा गो अग्ने ये नमसे त्रिव ॥ ४४ ॥ त्र्यैं
चं गायत्रमर्पणांगः पंचपंचधन्यो ॥ पिश्रावहं राग्भ्यां मिमितिसप्तमाहः मपो लथा ॥ ४५ ॥ वायुष्टूर्प्प

भ्यामिति नवमे दशमे न रात्रा॥ अश्विभ्यां च मरुद्भ्यश्च द्वादशैकादशे भवेत्॥४६॥ विश्वेभ्यो देवेभ्य इति त्रयोदशाच्चतुर्द-
श॥ अथ मन्त्रे हव्यवाहाग्नये च तिथिसंख्यके॥४७॥ अथ मन्त्रे षोडशे स्यात्त्रातः सप्तदशे भवेत्॥ वैश्वानराख्याग्नये
च नन्थैकाह्रादशेपि च॥४८॥ द्यावापृथिवीभ्यामिति विंशत्येकोनविंशयोः॥ द्वेषयोरग्नये वै निर्ऋ च स्नाः अथ सं-
प्रतं॥४९॥ अग्नेर्मन्त्वे प्रथमस्य प्रचेतसो यं पांचजन्यं बहवः समिंधते॥ विश्वस्यां विशि प्रविशिवांसमीमहे स नो
मुंचत्वंहसः॥५०॥ यस्येदं प्राणन्निमिषद्यदेजति यस्य जातं जनमानं च केवलं॥ स्तौम्यग्निं नाथितो जोहवीमि स
नो मुंचत्वंहसः॥५१॥ इंद्रस्य मन्त्वे प्रथमस्य प्रचेतसो वृत्रघ्नः स्तोमा उप मामुपागुः॥ यो दाशुषः सुकृतो हवमुप
गंता स नो मुंचत्वंहसः॥५२॥ यः संग्रामं नयति सं वशी युधे यः पुष्टानि संसृजति त्रयाणि॥ स्तौमीन्द्रं नाथि-
तो जोहवीमि स नो मुंचत्वंहसः॥५३॥ मन्त्वे वां मित्रावरुणा तानप्यविज्ञं सत्यौ जनमाहं हम्या यं नुदेथे रायाजातं म-
रथं यां नडग्राना नो मुंचतमागमसः॥५५॥ वायोः सवितुर्विदथानि मन्महे यावात्मन्वद्विभृतो यौ च रक्षतः॥
यौ विश्वस्य परिभू बभूवतुस्तौ नो मुंचतमागमसः॥५६॥ उप श्रेष्ठा न आशिषो देवयोर्धर्मे अस्थिरन्॥ स्तौमि वा-
युं सवितारं नाथितो जोहवीमि तौ नो मुंचतमागमसः॥५७॥ रथीतमौ रथीनामह्व ऊतये शुभंगमिष्ठौ सुयमेभि-
रश्वैः॥ ययोर्वां देवौ देवेष्वनिशितमोजस्तौ नो मुंचमागमसः॥५८॥ यदयातं वहतुं सूर्यायास्त्रिचक्रेण संसदमिच्छमा-
नौ॥ स्तौमि देवावश्विनौ देवेष्वनिशितमोजस्तौ नो मुंचतमागमसः॥५९॥ मरुतां मन्त्वे अधि नो ब्रुवंतु प्रेमां वाजं
विश्वामवंतु विश्वे॥ आशून्हुवे सुयमानूतये ते नो मुंचंत्वेनसः॥६०॥ तिग्ममायुधं वीडितं सहस्वद्दिव्यंश

हृदमन्नाद्भुजिह्व ॥ सोऽसि देवाम्पत्नो नाथितो जोहवीमि तेनो मुंचत्स्वेनमः ॥ ६१ ॥ देवानां मध्ये अधिनो ब्रुवंत प्रेमांवा
र्यथासंभवेत् ॥ होमकर्मण्यशक्तस्य विप्रस्य द्विगुणो जपः ॥ १३ ॥ इतरेषां तु वर्णानां त्रिगुणादिर्विधीयते ॥ होम
द्विगुणाजप्येनैव संपूर्णांतपराभवेत् ॥ १४ ॥ अशक्ते मार्जने प्रोक्तस्तर्पणाद्द्विगुणो जपः ॥ प्रत्याम्नायो त्रलभो
ज्ये न कुत्रापि मयाश्रुतः ॥ १५ ॥ सर्वथा भोजयेद्विप्रान् कृतसांगत्वसिद्धये ॥ विप्राराधनमात्रेण व्यंगं सां
गं प्रजायते ॥ १६ ॥ यानि यान्यपि कर्म्माणि ईयन्ते द्विजभोजनैः ॥ निरर्थकानि तानि स्युर्वीजानूषरगानि
च ॥ १७ ॥ गुरुंसंतोषयेत्सम्यक्शक्तो हिरण्यवादिभिः ॥ गुरौ तुष्टे हि संतुष्टा मंत्राः सिद्ध्यन्ति मंत्रिणः ॥ १८ ॥ यदृच्छया
श्रुते मंत्रश्छद्मनापि छलेन वा ॥ परिरितं वा गाथावानजा — पनर्थं कृतं ॥ १९ ॥ पुस्तके लिखितान्मंत्राना
लोक्य प्रजपंति ये ॥ ब्रह्महत्यासमं तेषां पातकं परिकीर्तितं ॥ २० ॥ अनेककोटिमंत्राणां चित्तमाकुल
नाकरि ॥ मंत्रंगुरुमुखात्प्राप्यमेकंस्यात्सर्वसिद्धिदं ॥ २१ ॥ कुलप्राप्तकुलाचारी मानितः सर्वसाधकैः
सिद्धिलक्षणासंपन्नः प्राणिमात्रस्य यः समः ॥ २२ ॥ मित्रं तज्ज्ञात्वा यस्य सर्वमार्गप्रदर्शकः ॥ स एव गु

न कार्यो वान्यो वा मे कदाचन ॥ २३ ॥ इहलोके परत्रापि कोलः पतति चान्यथा ॥ सिद्धेरभावे दक्षेन पापहानिः प्रजा
यते ॥ २४ ॥ सेवनान्मचतुष्कस्य वामे नु निरयाः पुनः ॥ इत्थं प्रोक्ता परश्चर्या किमन्यच्छ्रोतुमिच्छसि ॥ ६२५ ॥ इति श्री
महापापापहाकालानुमते मेरुतन्त्रे शिवप्रणीते परश्चर्याप्रकाशः षष्ठः ॥ ६ ॥ श्रीदेव्युवाच ॥ अस्मिन्घोरे
कलियुगेस्वल्पसिद्धानिदर्शिताः ॥ भविष्यन्ति जनास्तेषां स्थिरा सिद्धिः कथं भवेत् ॥ १ ॥ अग्रे ईशादिवृद्धिश्च वंशं दे
वकृपा तथा ॥ मोक्षः कथं साधकस्य तथा वद कृपानिधे ॥ २ ॥ ईश्वर उ० ॥ अहंकारपरित्यागात्काम्यकर्मविव
र्जनात् ॥ स्वधर्माचरणात्सर्वमनायासेन जायते ॥ ३ ॥ एतत्कर्ममहाकष्टं त्रिविधं तु परित्यजेत् ॥ विहितं क
र्म कुर्वीत सिद्धिः स्यात्तत्रपौत्रिकी ॥ ४ ॥ तत्रादौ कथयिष्यामि निषिद्धानि शिवे शृणु ॥ देवस्थाने गुरुस्थाने श्म
शाने च चतुष्पथे ॥ ५ ॥ पादुकासनशिष्टान्नं मैथुनानि विवर्जयेत् ॥ प्रमत्तां पतितां कन्यां गुप्तिं नोपाति
तम्नर्नां ॥ ६ ॥ विरूपां वा मुक्तकेशीं कामानीं च न निंदयेत् ॥ कस्यायोनिं पश्येज्जीऊं दिग्वस्त्रां तु कल्पनां ॥ ७
नालोकयेत्परद्रव्यं परदारांश्च वर्जयेत् ॥ छायां गोगुरुदेवाग्निकोशपुस्तकसंभवं ॥ ८ ॥ नैव प्रसारयेत्पादौ
न चैनानि विलंघयेत् ॥ आलस्यमदसंमोहशाठ्यपैशुन्यविग्रहान् ॥ ९ ॥ असूयामात्मसंमानं परनिंदा
च वर्जयेत् ॥ लिंगिनं व्रतिनं विप्रं देववेदांगसंहिताः ॥ १० ॥ पुराणागमशास्त्राणि कन्यांश्चापि न हव
येत् ॥ भगप्रशस्तमस्यान्तं हामवल्लीफलमूलवलं ॥ शूर्पसंमार्जनीं दरां ध्वजं वै हृयं पाडवं ॥ कलहं वा मदं छ

त्रं दर्पणांश्च घण्टां तथा ॥ १२ ॥ भोगयोग्यानि चान्यानि यागद्रव्याणि यानि च ॥ मण्डपस्थानेषु वास्तूनि यानि वा देवतालये
१३ ॥ दिव्योज्ञानि पदार्थानि भूतानि विद्यानि यानि वै ॥ लंघयेज्ज्ञानतो नैतानि न चैतानि पदास्पृशेत ॥ १४ ॥ यागोच्छिलो
कविद्विष्टाग्रायस्त्वेरपि सर्पिणी ॥ परहिंसात्मिका याच न तामव नरे क्वचित ॥ १५ ॥ प्रतिग्रहं नरस्त्रियादलम
भोगविधिस्सया ॥ देवतातिथिपूजार्थं यन्त्रतोप्यर्जयेद्धनं ॥ १६ ॥ विभीतककरंजोत्थां कान्तु छिक्वा यां न संश्रयेत ॥
स्तंभदीपमनुष्याणामन्येषां प्राणिनां तथा ॥ १७ ॥ नखाग्रकेशनिर्धूतमस्नानवस्त्रपटोदकं ॥ स्नानस्पर्शोत्सनेह
रं खररथ्याजरजस्तथा ॥ १८ ॥ विगत्वानं च तिर्यांस्तं नाद्यान्नेव वलंघयेत ॥ नयाप्रगाहयेत्सर्वंदधा क्वाशिवदोषि
ते ॥ १९ ॥ न लंघयेद्गुरोराज्ञामुत्तरं न वदेत्तथा ॥ अप्रियं च तथा काले कामक्रोधौ विशेषतः ॥ २० ॥ नाग्रछत्रमुखो
क्त्वा कुर्याद्गुरोरग्रे कदाचन ॥ अद्वैतं देवपूजां च गुरोरग्रे परित्यजेत ॥ २१ ॥ पादुकायोगपट्टादिगुरुचिह्नानि सादरं ॥
न लंघयेत्स्पृशेन्नैव न तन्मस्तकं न धारयेत ॥ २२ ॥ पर्यंकशयनं तस्य छत्रपादपदप्रसर्पणं ॥ अंगभंगं वलितोत्वल
कुर्याद्गुरुसन्निधौ ॥ २३ ॥ छायां न लंघयेत्तस्य गच्छेत्तत्पुरतो गुरोः ॥ न कुर्वीत गुरोरग्रे पृथ्भावं शिष्यसंग्रहं ॥ २४ ॥
अहंकारं न कुर्वीत न नोल्वारां धारयेद्बुधः ॥ गुरोः सन्निधौ नैव स्वगतं प्रणामेद्बुधः ॥ २५ ॥ नमस्कारान्य वोध्रकं
गुरुर्दृष्ट्या निवारयेत ॥ नतियोगे गुरोर्दृशा शुभ्रदन्नैव भाषयेत ॥ २६ ॥ श्रीनाथदेवस्वामीति बोधने भाष
णो वदेत ॥ आज्ञायामपि देवेशो शपथं गुरुसन्निधौ ॥ २७ ॥ न कुर्याच्छिवमंत्रं वा गुरुमादेनक्रियेत चेत ॥ तदर्थं
निर्वहेद्यत्नाद्दत्ते पूजाजपादिनि ॥ २८ ॥ प्रतिवीहज्जकार्यस्य यदर्थं शपथः कृतः ॥ प्रायश्चित्तं समतः कुर्या

म्मूला त्वस्य सप्तकं ॥ ३१ ॥ लोकोद्वेगकरी यावन्मावमर्मनिकृन्तनी ॥ — सुद्वेगकरी थाच नांगिरे नैव भाषयेत् ३२
रस्यमप्युत्त्वलमपि मनसोपि समीप्सितं ॥ लोकविद्वेषणं वेषं नर स्त्री या न्कदाचन ॥ प्रयोक्तव्यः स्वयं मं
त्रो महापद्यपि साधकैः ॥ ३३ ॥ गन्डं भूतना देवभयान्नाथेन वापुनेः ॥ कृपया परया कुर्यादनाथेषु स्वसंत
दि ॥ ३४ ॥ यत्रयत्रपरीवादो मात्सर्यो कुयते गुरोः ॥ तत्रतत्र नवक्तव्यं पृथापान्तं स्मरन् हृदि ॥ ३५ ॥ विशोः
श्चिवस्यश्रास्तस्य वेदस्यार्कणगोश्चयोः ॥ भवान्या वायत्रनिंदा न त्किंस्यान्नैव सेनन ॥ ३६ ॥ कर्मणां मनसा
वाचा न हिंसेत् स्वर्हारकान् ॥ सद्धीः स्त्रियो नैनो कार्यं शापानुग्रहकर्माणि ॥ ३७ ॥ न तेन मंत्रो वक्तव्यो मुद्रा वा
समयाः ॥ अपि सिद्धमंत्रस्य कर्तव्यं त्रिविधं पारिकीर्तितं ॥ ३८ ॥ नित्यं नैमित्तिकं काम्यं मंत्रादौ नित्यमु
च्यते ॥ देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवता ॥ ३९ ॥ सिद्धानां सिद्धाधिवासांश्च श्रीपूर्वं समुद्धारयेत् ॥ धा
रयेदार्जवं सत्यं सोशी स्वं समवतां हानि ॥ ४० ॥ शान्तिं दयामवस्थां च दिव्यां शान्तिं च सर्वदा ॥ गमनागम
ने कुर्यात्स्वगात्रस्य गुरुपादुके ॥ ४१ ॥ पश्चात्पादेन निर्गच्छेत् स्वगात्रस्य च गुरोर्गृहात् ॥ मलमूत्रादिरहितः के
शश्मश्रुविलंघनात् ॥ ४२ ॥ सोमसूर्यानरस्त्रीचगवाश्वत्थादिमध्यगं ॥ भावयेद्देवमात्मानं विष्णुरूपं वि प्रहारी
रगां ॥ ४३ ॥ मन्येत मा नापि नरो विच्छेदं न कुर्यात् प्रियानिशि ॥ त्रयो विश्वाभ्रयो वि ष्णु रात्मा हेयं च विष्णुव
त ॥ ४४ ॥ स्वानज्ञानेन यत्कर्म सर्वं सर्वस्य गोपयेत् ॥ मंत्राणां प्रतिष्ठाकर्तव्यां सततं मंत्रसिद्धये ॥ ४५

92

गुरोर्वा महत्त्वं या हृद्देशस्वरूपके त्विति ॥ अर्थो पूर्वगुरोर्नामदेवनाम मनःपरं ॥ ४६ ॥ पादशब्दसमेतोयं नतमूर्ध्नाञ्जलीकृत
जसं तं च वदेत्तामान्तिर्थ्यगिं वहरं मम ॥ ४७ ॥ नित्ये नैमित्तिके काम्ये सापेक्षं पूर्वपूर्वतः ॥ अन्यथा भवनं देवी करोत्याप
रंपरां ॥ ४८ ॥ भुक्त्यहं क्रियते पूजा सा तु नित्या प्रकीर्तिता ॥ नैमित्तिकापि नक्षत्रा पर्व तत्त्वा परादिने ॥ ४९ ॥ अ
भावे वा कदाचित्सा नित्यने नैमित्तिकात्वियं ॥ अष्टाने नैमित्तिका पूजा प्रोक्ता विंशतिभेदिका ॥ ५० ॥ पर्वाणि च म
हाघातान्यमीपातः सवेधृतिः ॥ मन्वादयो युगाद्याश्च विशंगदेवताभवे ॥ ५१ ॥ पुष्पाश्चापि विवाराश्च त्रियन्ताणां
स्वक्रियकं ॥ जन्मार्हश्चापि दिव्यायाः दिवसं नवरात्रके ॥ ५२ ॥ ग्रहणं नाम्नस्थपूजाया आवश्यकदिनं भुवि ॥
विशेषावश्यकता यस्मिन् पूजां भवति निष्फला ॥ ५३ ॥ देशिकागमने चैव वीरस्वजनदर्शने ॥ चंद्रसूर्यौ धराशौ च लाभे
ह्येमे वृजोत्सवे ॥ ५४ ॥ पीठे पीठगमे पुण्यतीर्थदेवतदर्शने ॥ रोगे ह्य पन्तु दोषेषु दुःसंगे ऽनैमित्तके ॥ ५५ ॥ यथा
कालं यथाश्रद्धा यथाकालं यथोचितं ॥ यथाबलं यथादेशं तथा पूजां समाचरेत् ॥ ५६ ॥ नैमित्तिकाश्च नेकानाः
प्रातर्मध्याह्नसंगवाः ॥ प्रदोषरात्रिविप्रेशार विविसोऽशाक्रिता ॥ ५७ ॥ दमनेनर्चयो देवं वर्षमस्येन पूजये
त् ॥ तस्य वर्षकृतं पूजाफलं नश्यति कामरात् ॥ ५८ ॥ चैत्रादयस्तु ये मासाः प्रशस्ताः पूर्वपूर्वतः ॥ अष्टमीनव
मीपोर्णमास्याश्च चतुर्दशी ॥ ५९ ॥ एतन्मध्येन कस्याश्चिद्वादिने सुप्रदोषके ॥ कृतनित्यक्रियः शुद्धो भक्तः
सामाधिकैर्जनैः ॥ ६० ॥ दमनस्य समीपे तु गत्वा सन्नुपाविशेत् ॥ प्राणायामत्रयं कृत्वा ऋष्यादीन् विन्यसे
त्ततः ॥ ६१ ॥ कामनस्य समुद्भूतः रतिवाष्पजलोद्भवः ॥ ऋषिगंधर्वदेवादिमोहनाय नमोस्तु ते ॥ ६२ ॥ सांवत्सरि

॥ मे.तं ॥
॥ ९३ ॥

कृपूजायाः परिपूर्णात्वासिद्धये ॥ दमनत्वं समायाहि क्षमस्व वनमोस्तु ते ॥ ६३ ॥ शिवप्रसादसंभूत अत्र सन्निहितो भव
शिवकार्यं समुद्दिश्य नेतव्योसि शिवाज्ञया ॥ ६४ ॥ एवं दमनमामंत्र्य कामदेवं तथाराते ॥ क्लीं तिं च पूजयेत्तत्र तत्र
मंत्रेण साधकः ॥ ६५ ॥ तारः क्लीं कामदेवाय नमश्चेति नवाक्षरः ॥ श्रीं श्रीं श्रों क्रो फिति फ्रो क्ष्मा स्मो हत्वा ८ वर्णकः
६६ ॥ रतिस्थाने ङीति पददयमप्यष्टवर्णंका ॥ नमः स्वगृहमागच्छ द्वितीयदिवसेप्युत ॥ ६७ ॥ कृत्वा नित्यक्रियं स्वे
ष्टे ऐं क्रों दमनमाव्रजेत् ॥ उत्थाप्य छेदयेत्तच्च पूजस्थात्वमंत्रतः ॥ ६८ ॥ गृहमानीय यत्नो येन मंत्रेणाऽत्रेन सेच
येत् ॥ ॐ अघोरे ऐं वउं च घोरेह्रीं मिति कीर्तयेत् ॥ ६९ ॥ घोरघोरतरे श्रीं वसर्वेभ्यः सर्वसर्वेभ्यः ॥ नमस्तेऽस्तुरूपे
भ्यः ह्रीं श्रीं मिति मनुः स्मृतः ॥ ७० ॥ वनात्रिंशदक्षरात्मा दमनं तं निधापयेत् ॥ पूजास्थाने च पीठादौ नवांशांस
स्पकारयेत् ॥ ७१ ॥ कृत्वा चाष्टदलं पद्मं तत्र भागान् प्रविन्यसेत् ॥ चंदनागरुकर्पूरकुंकुमैस्तैर्वयेत्तमान् ॥ ७२
स्त्रानं देशा बीजवर्णौ बिंदुमद्भिर्नमोन्तकः ॥ पथकल्प्यामृतह्रीं जंसहक्षमलवरयीं ॥ ७३ ॥ ॐ नमो इति मध्ये वो
धस्रं मंत्रेण रक्षयेत् ॥ त्रिशूलखड्गं वध्वाथ भ्रामयेद्दमनोपरि ॥ ७४ ॥ अस्त्रमंत्रेण पश्चान्नवस्त्रेणाछादयेत्
तं ॥ रहसि स्थापयेदेनत्तं प्राक्क्षपाधिवासनं ॥ ७५ ॥ द्वितीयेह्नि नतः स्नात्वा नित्यकृत्यं समाप्य च ॥ पुण्याहवा
चनं कृत्वा दमनं तं समानयेत् ॥ ७६ ॥ पूजास्थाने प्रकुर्वीत सर्वतोभद्रमंडलं ॥ तस्य हृदिक्षु संस्थाप्याघ
टाः स्वर्णादिनिर्मिताः ॥ ७७ ॥ मध्येथवा कुंभमेकमष्टशंखः स्थापयेत्ततः ॥ ततस्त्वासनपूजादियोगपीठं तमर्चये

93

॥ दम: ॥
॥ ९३ ॥

त ॥ ७८ ॥ तस्य दक्षिणदिग्भागे सिंदूरेणाष्टपत्रकं ॥ पद्मं कुर्याद्वृत्तयुग्मवेष्टितं भूपुरेण च ॥ ७९ ॥ पंचवर्णरजोभि
श्च कर्णिकामामशोककं ॥ लिखित्वा प्रार्थयित्वा तं पूजयेच्चंदनादिभिः ॥ ८० ॥ अशोकाय नमस्तुभ्यं काम
स्त्रीशोकनाशकः ॥ शोकार्तिं हर मे नित्यमानंदं जनयस्व मे ॥ ८१ ॥ तस्य दक्षिणतस्त्वाष्टकमण्डले पूजये
त्पुनः ॥ वराखड्गधरं कालं पंचवर्णैर्विचित्रितं ॥ ८२ ॥ उग्रादिप्रलयांतो यः कालरूपो महाबलः ॥ कलयत्यखि
लं विश्वं यस्तस्मै कालात्मने नमः ॥ ८३ ॥ अशोकस्य तु सोधस्तात्त्रिकोणमण्डले शुभे ॥ मातृकादिस्थानान्न्यासांतं
पीठपूजां समाचरेत् ॥ ८४ ॥ तद्बाह्येऽष्टदले प्रोक्ताः शक्त्यष्टकसमर्चनं ॥ सौभाग्यो च तथा हर्षो दर्पो चापि धृ
तिं रतिं ॥ ८५ ॥ प्रीतिं च संगमां निर्वाणां स्वां मध्ये तु कार्मुकां ॥ आवाह्य कामदेवं च तद्गायत्र्या तदनंतरं ॥ ८६ ॥
कामदेवाय विद्महे पुष्पबाणाय धीमहि ॥ तन्नोऽनंगः प्रचोदयात् ॥ ८७ ॥ कृत्वा प्राणप्रतिष्ठां तु ततो मुद्राः
प्रदर्शयेत् ॥ पाशांकुशधनुर्बाणाभिधा ध्यायेत्ततः परं ॥ ८८ ॥ रक्तांबरं रक्तवर्णं रक्तगंधानुलेपनं ॥ रक्तमाल्यं च
तरुणं वामदक्षिणयोर्युतं ॥ ८९ ॥ रत्याप्रीत्येक्षुकोदण्डपुष्पबाणमवःकरो ॥ ऊर्ध्वे पाशांकुशौ प्रसंदधबौक्तं
च मतुत्रयं ॥ ९० ॥ रक्तवस्त्रपरिधानां सर्वाभरणभूषितां ॥ पद्मद्वयकरां गौरवर्णां ध्यायेद्रतिं शुभां ॥ ९१ ॥
श्यामवर्णां रक्तवस्त्रां सर्वाभरणभूषितां ॥ नावृताम्यां भजे प्रीतिं घटपुष्पलसत्करां ॥ ९२ ॥ अत्रैतु कामदेव
स्य वसनं परिदापयेत् ॥ सुधाकुंभं वामहस्ते दक्षिणे कुसुमाकरं ॥ ९३ ॥ कदंबवनमध्यस्थं रक्तमाल्यां भ्रका

ध्यायेद्वसंतं गौरांगं सुरूपं लोकमोहनं ॥ ९४ ॥ वसंतसेनाय हृदयं नमः सप्ताक्षरो ऽयं ॥ पूजाद्यर्थं ततो ग्रीशरक्षोवा
यव्यमध्यमः ॥ ९५ ॥ चतुर्दिक्षु च वह्नीशंशु गनेगस्य वीतकं ॥ पठित्वा हृदयादीनि षडंगानि प्रपूजयेत् ॥ ९६ ॥ नद
ग्राक्ष्वदले देवमुखतनस्थ पुदक्षिणं ॥ कामं भस्मशरीरं कामंगं मन्मथमेव च ॥ ९७ ॥ वसंतस्य सखायं च स्मरमिक्षु
धनुर्द्धरं ॥ पुष्पवाणं न्दग्रे तलो देशा नायुधानि च ॥ ९८ ॥ ततस्तु कामगायत्र्या यथाशक्त्या जपं चरेत् ॥ वसंतं का
मदेवं च भक्तो काम्यं प्रार्थयेदिति ॥ ९९ ॥ वसंतायन गुल्मभ्यं वृक्षगुल्मलताप्रिया ॥ सहस्रपुतसेवाऽकामपहू
पनमोस्तुते ॥ १०० ॥ नमोस्तु पुष्पवाणाय जगदानंदकारिणे ॥ मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय च ॥ १
कामदेव पुराण्याथ मूलन्यासं समाचरेत् ॥ आवाहयेत्स्वयं कुंभे देवं सांगं च पूजयेत् ॥ २ ॥ आवाहितो सि दे
वेश सद्यः काले मयाविभो ॥ कर्तव्यंतु यथालाभं पूर्णं पं चंत्वदाज्ञया ॥ ३ ॥ इति सावरणं देवं दमनैः पूजयेत्
नः ॥ धूपदीपादिकं दत्वाग्नि त्वहोमं समाचरेत् ॥ ४ ॥ इत्येवं देवकल्पोक्तैर्मन्त्रैस्त्रिगुणोजपात् ॥ पूजाशेषे
समाप्याथ प्रार्थयेद्देवतामिति ॥ ५ ॥ सर्वरूप जगन्नाथ वांछितार्थफलप्रद ॥ हृत्स्थान्पूरय मे देव कामा
न्कामेश्वरेश्वरः ॥ ६ ॥ एवं संप्रार्थ्य देवेशं विसृज्य च गुरुं ततः ॥ इत्थं संतोषयेद्विप्रान्भोजयेदिति तद्दिनेः ॥ ७
पवित्रनाम नागायवरो दनलक्षं भुना ॥ पवित्रारोपणायैतन्न कृतं तत्फलेन वः ॥ ८ ॥ कुर्यात्सिथुनमं
क्रांते रवला संक्रम माणावधि ॥ आषाढ्ङनमो मासः श्रावणो मध्यमो भवेत् ॥ ९ ॥ हीनो भाद्रपदः पक्षः श्वेतः
सर्वमध्यमोसितः ॥ अष्टम्यां च चतुर्थ्यां च चतुर्दश्यां पवित्रकं ॥ १० ॥ नवम्यामपि कर्तव्यं कृतानिष्ट पयाः

मं॥ सौवर्णराजतं तान्त्रं क्षौमं कार्पाससंभवं॥११॥ पट्टेनं तु गृहस्थानां वनस्थानां तु वल्कलं। पट्टजान्ते सौगतानां
भ्रूडाणां सौमपी छ्यते॥१२॥ वहूनां दर्भसंजातं वैश्यानां तु शणोद्भवं॥ पुंजजान्तं व्रतस्थानां आविकं समरैषि
राणां॥१३॥ सरक्तं नवसूत्राणां मष्टोत्तरशुभैःस्तरैः॥ पवित्रं परमं प्रोक्तं तदर्द्धं मध्यमं स्मृतं॥१४॥ कनिष्ठं सप्तवि
शन्या तावदंगुलदीर्घकं॥ पूजावरतो देवानां तुल्यादिर्वयेद्बुधः॥१५॥ षट्त्रिंशद्ग्रंथयः श्रेष्ठ चतुर्विंशत्युम
ध्यमे॥ द्वादशैव कनिष्ठेस्युरथान्यद्वपवित्रकं॥१६॥ पूजास्थानस्य विस्तारे दैर्घ्यं पाने पवित्रकैः॥ अष्टोत्तर
शतैर्युक्तना वत्स्यैश्च ग्रंथिभिः॥१७॥ वितानवञ्जित्रिवध्रीयान्पूजास्थानोर्द्धं तलकं तत॥ स्कंधाद्वनाभिपर्यं
तं दशग्रंथिसमन्वितं॥१८॥ कर्मेशानां च शिष्याणां पवित्रं तदुदाहृतं॥ अन्येषां त्विष्टयाकुर्योत्तंतु ग्रंथि
भूतानि च॥१९॥ ग्रंथीनां वेष्टनं श्रेष्ठं षट्त्रिंशद्विस्थितंतुभिः॥ चतुर्विंशतिभिर्मध्यमधमं भानुभिः स्मृतं॥२०
ग्रंथयो वर्ममंत्रेण कर्त्तव्याः प्राग्दिने तत॥ रात्रौ धामपिकैः सार्द्धं पवित्राणि समानयेत॥२१॥ पूजास्था
नेपसिंदूरंकुंकुमारक्तचंदनैः॥ कस्तुरिविधुलाक्षाभिर्गैरिकाद्यैर्विचित्रयेत॥२२॥ ग्रंथिस्थानेषु संस्था
प्य पीठे तत्र च तंतुषु। देवता नवकं पूज्य ओंकारश्चेद्रमास्तथा॥२३॥ वन्हिर्ब्रह्मानागगुहरविष्णुः पिमदा
शिवः॥ सर्वदेवाश्चाभिपूज्याः शिरोमंत्रेणमंत्रयेत॥२४॥ अभ्युक्षयेच्च हृन्मंत्रेणास्त्रमंत्रेणरोधयेत॥ ते
षा दशग्रंथिषु च संपूज्या दशशक्तयः॥२५॥ क्रिया च पौरुषी वीरा गायत्री चापराजिता॥ विजया च

जयाभक्तिः सदाशिवा मनोन्मनी ॥ २६ ॥ पवित्रे सुमनतः पूज्यं मूलमंत्रं षडंगकं ॥ घटे सुनिक्षिपेत्तानि गंधपुष्प
युतानि च ॥ २७ ॥ सर्वौषधीं पंचरत्न युतानि छादयेत्सुनः ॥ वस्त्रयुग्मेन नीलेन चवज्रमुक्ताफलं तथा ॥ २८ ॥
पद्मरागं मरकतं सर्वौषधीगणान्वयं ॥ रजनीद्वयसिद्धार्थकुष्ठंमुस्ताप्रियंगवः ॥ २९ ॥ लामकशैलफलिनी
मुरामांसी च लोध्रकं ॥ वेधयेत्तु वितानाद्यं पवित्रं च महत्तथा ॥ ३० ॥ कृत्वा न्यासादिकं तत्र प्राग्वत्सकलीप्र
कल्पयेत् ॥ कुंभे देवं समावाह्य यजेदावरणैः सह ॥ ३१ ॥ देवाय मूलमंत्रेण पवित्रस्य समर्पणं ॥ देवतेभ्यः
पवित्राणि दत्वा होमं समाचरेत् ॥ ३२ ॥ मूलेन वनयेदग्नौ पवित्रं पूजयेत्ततः ॥ संतोष्य च गुरुं पश्चाद्दक्षि
णाद्यैः पवित्रकं ॥ ३३ ॥ दत्वा तस्मै स्विष्टकृतं हुत्वा पूर्णाहुतिं चरेत् ॥ गुरोरनुज्ञया कुर्यात्स्वयं पवित्रधारणं
३४ ॥ दत्वा सामयिकेभ्यश्च ब्राह्मणान्भोजयेत्ततः ॥ तेभ्यो दत्वा पवित्राणि दीनान्यर्थांश्च तर्पयेत् ॥ ३५
दत्वा च भूयसीं पश्चात्स्वयं भुंजीत वाग्यतः ॥ अनित्यं ह्यत्र संप्रोक्तः पवित्रारोपणो विधिः ॥ ३६ ॥ काम्यक
र्माणि वक्ष्यामि तत्रादौ शांतिरुच्यते ॥ शांतिर्नाम मनुष्याणां रोगकृत्वादिनाशनं ॥ ३७ ॥ षोढा विभज्याहो
रात्रं पंचमेंशे तु शांतिकं ॥ हेमंते च षट्कर्त्तव्यं नासाधश्चलते यथा ॥ ३८ ॥ वायुर्जलदतो यतस्तेन तस्मिन्न शां
तिकमाचरेत् । श्वेतवर्णेन निर्माय चतुरस्रं तु मंडलं ॥ ३९ ॥ पूजयेच्च जलं वा देवं बीजेनात्र शांतिके ॥ उत्त
राभिमुखो भूत्वा शांतिकं तु समाचरेत् ४० ॥ शांतिकादौ रतिः पूज्या पद्मसंज्ञं प्रदर्शयेत् । बध्वा पद्मासनं

स्येयेनमोनःशान्तिकेमतः॥४१॥शान्तौकुशासनंग्राह्यंहोमयेन्मृगमुद्रया॥मुक्ताकत्रिसूत्रिकांयत्रहूयतेमाप्नुगी
भवेत्॥४२॥त्रिपूजराज्ञपूर्वांमुद्रांत्रिकंस्यात्रिजन्मसु॥अथवश्यंप्रवक्ष्यामिव्वोपनिकरांगुतम॥४३॥देवर
क्षोराजलोकसर्पस्त्रीहयहस्तिनां॥अथमेंद्रोवश्यकर्मवसंतेचप्रसिध्यति॥४४॥नासोद्भुवहतेवायुराग्नितन्व
चहेत्तदा॥वश्यंकुर्यात्त्रिकोणेतुरंगीजेनाग्निपूजनं॥४५॥रक्तवर्णोनतिर्मीयवश्यंपूर्वंमुखश्चरेत॥वा[illegible]ीमंपू
जयेद्वश्येपाशाङ्कुशमुद्रांप्रदर्शयेत॥४६॥स्वस्तिकासनमारुह्यस्वाहांतंमंत्रमुच्चरेत॥छागलेचर्मवश्येस्यात्होमये
न्मृगमुद्रया॥४७॥रक्तद्रव्येस्तुहोमोध्यानमारक्तकंमतं॥मृगांस्यचित्रामित्रर्क्षेविशाखोकृतिकाम्गु॥४८
अथस्तंभंप्रवक्ष्यामिनडयोगनिवारणं॥गजराजोरगव्याघ्रादिकोपनिवारणे॥४९॥शिशिरेस्तंभनंप्रो
क्तंषष्ठ्यांशोतुदिनस्यनत॥अग्नेरपांचसैन्यस्यकुद्रव्यविषदस्युसां॥५०॥नर्यणार्थेमेषरक्तपीतस्थितंततोय
मावहेत॥जानुभ्यामवनींगत्वास्तंभनस्यक्रियाचरेत॥५१॥जारचोरमुजोस्तंभोधर्मःप्रेतादिक्षेसां॥ना
सादराडेनस्तंलक्ष्मोगाग्नुक्ष्मैड्रुदयोभवेत॥५२॥स्तंभकर्मतदाकुर्यात्तंबीजेनवसुंधरां॥अष्टवक्त्रशुतेपीतमाल्य
लेनांसमर्चयेत॥५३॥प्राङ्मुखस्तंभनंकुर्यात्डस्यांतंत्रंचपूजयेत॥विकटासनगोदेवोगदामुद्रांप्रदर्शयेत
५४॥स्तंभनेचषडंतश्चहोमेमंत्रप्रकीर्तितः॥गजचर्मासनंस्तंभेमृगीमुद्रांतुहोतथा॥५५॥पीतद्रव्येश्चात्रहोम
पीतद्रव्यादिहूकचयं॥स्तंभनेभरणीविशाखारोहिणीचोत्तरात्रयं॥५६॥अथविद्वेषणंवक्ष्येप्रीतिनाशःसत्र
द्वयो॥ग्रीष्मेविद्वेषणांघस्रषष्ठांशेतुद्वितीयके॥५७॥नासाग्रांपांमध्यगेवायोत्वोदयेद्वेषणमतं॥वर्नेते

क्षमवर्णेन मरालेखं समर्चयेत ॥५८॥ देवीजे नाथ विद्वेषे बंनैऋत्यापि मूलं चरेत ॥ दूर्वाक्षमावनिद्वेषे मजानपद्म
लाभवेत ॥५९॥ होमे मंत्रः फडंतोत्र विद्वेषउलूककासने ॥ विद्वेषे जांबुकं चर्मलोमासनमथापि वा ॥६०॥ धू
म्रतर्नौच्छिलेनथं माहृत्यस्त्रादिसाधकः ॥ आर्द्रवस्त्र धृयं मूलं जपेद्वा विद्वेषरोगमता ॥६१॥ उच्चाटने पथोव
क्ष्येन दशीशां प्रवालनं ॥ जाचुंदुत्राटने शास्त्रे विषवृक्षांकुरो दिनस्य च ॥६२॥ निर्यगाने समीरेन वा भवेदति नत्र
न ॥ शात्रोरुच्चाटनं कुर्यात् धीमीजे नत्रमर्चयेत ॥६३॥ मक्षोरुणपाड्लेवायोः कृलंबङ्गिंडलांछिनं ॥ मगचर्माम
नं तत्र शायं न्यास्ये च कर्मणि ॥६४॥ डुर्गीमंदजनयेत्कुंडाम शनीनाम दर्शयेत ॥ वन्नासनं समाहूतः फट् स्फ
डुमौमन ॥६५॥ धूमधूचाटने ध्यानं कृत्व डौलथाडुनेन ॥ उच्चाटने क्षिप्रमेन्नुवरभेषु प्रशस्यते ॥६६॥ मार
णं प्रारात्तनं शत्रूणां मारिनं तनत ॥ मारणोवर्तये हिंसानन्योश्चापि लुधार्मिकान ॥६७॥ स्त्रीवालयति
रिक्तेभ्यान वैरेषुयोजयेत ॥ स्वरोपनोवा लोकानां रक्षार्थं वा नदाचरेत ॥६८॥ ननुलोभाद्यावापि कुर्या
न्मंत्री नुमारणं ॥ प्रायश्चित्तं च कर्तव्यं देवि नहो वदाम्यये ॥६९॥ अन्यथा तं प्रजपेन्मंत्रं जुहुयाज्ञावदेवहि ॥
सघनेपायमेः कृष्णतिलैवांघ नसंभृतेः ॥७०॥ स्वात्मरक्षाप्रकर्तव्या कर्मकाले सदा बुधैः । अन्हस्थ
नर्थस्वांशाशः शारआरणा कर्मणि ॥७१॥ वस्पवन्मारणे कार्यं पलाशंवह्निमंडले । दक्षिणाभिमुखः कुर्या
द्द्रकालिं समर्चयेत ॥७२॥ दर्शयेत कृष्णडांच विशेष्ठजासनेकृनेन । कुंकारांतेनमंत्रेणामहिषंवाथ

96

लोहजं ॥७३॥ आसनं भूकरीपृष्ठं करसंकोचनो भवेत् ॥ ध्याने कुर्यान्कृष्णवर्णां कृष्णेऽष्टम्यां पूजनं ॥७४॥ उग्रती-
क्ष्णोभुषिस्थे पुरश्चैव डबलादिके ॥ शत्रोश्चैन दलाभावे चैकपादोपरि स्थितः ॥७५॥ उष्णोदके समाविष्टे तर्प-
णार्थं तु मारणे ॥ त्रिकूटं कुर्यान्मारणं वा भूमौ पादं निवेशयेत् ॥७६॥ वामपादे निविष्टः संश्चरेत्तत्र तु तर्पणं
प्रकीर्णान्यथ वक्ष्ये तेह पिचारांश्च तत्र च ॥७७॥ दक्षिणाभिमुखः कुर्यान्मेषीचर्माणि संस्थितः ॥ लोहासनग-
तो वापि सूकर्या पृडया हुनेत् ॥७८॥ धनसिद्धिकरं कर्म पश्चिमाभिमुखश्चरेत् ॥ गोस्वचिश्रापित्रेषु देवध्यानं
तु राजसं ॥७९॥ गोचर्मणासनं मोहे स्त्वासनं तं मंत्रमुच्चरेत् ॥ हरिद्रापिष्टितं तोयं तर्पणार्थं प्रयोजयेत् ॥८०॥
त्वामी चरो हेमानीत्र श्रेष्ठा चापि दूरगोसनं ॥ अथ सर्वाणि कर्माणि गोरोऽम्भेन प्रसाधयेत् ॥८१॥ नानाविधे-
षु कार्येषु व्याघ्रचर्मसमीरितं ॥ सर्वरत्नविभाकारं ध्यायेत्त्रिशूलमानसं ॥८२॥ पीयूषवर्षसंयुक्तं पूर्णाचं-
द्रसमप्रभं ॥ ध्यायेद्देवं विधं वापि सर्वकार्यप्रसाधने ॥८३॥ आयुःकरं तु सर्वत्र देवं ध्यायेतु राजसं ॥ अपमृत्यु-
जये प्रोक्ते पूर्वाचैवोत्तरात्रयं ॥८४॥ वषड्नोहोममंत्रो ध्यायेऽञ्जलदेवतं ॥ आकर्षणं च वन्हिकोणासंपुटे
स्मसमाचरेत् ॥८५॥ वश्योक्तमखिलं ज्ञेयमाकर्षे कार्यसिद्धये ॥ सर्वज्ञानप्रसिद्ध्यर्थं ईशानाभिमुखो भ-
वेत् ॥८६॥ सर्वविज्ञानकार्येषु पृष्ठेन केवलमासनं ॥ पुष्पादिसाधने मंत्रो वौषट्पल्लवसंयुतः ॥८७॥ ऐंसी
स्यान्नर्जनीमुद्रामुद्रा होमे तु पौष्टिके यथोक्तं देवताध्यानं कुर्यान्मौष्टिककर्मणि ॥८८॥ सर्वत्र भयनाश-

यवषडं नोऽङ्कुशो मन्त्रः॥ मन्त्राशो वसमाप्त ऊंध्याने वैरिमये भवेत॥८९॥ मंत्रमंजन कार्ये तु वषडं नोऽङ्कुशो मंत्रः॥ स्वाहान्ते
तु फडंन्तः स्याद्धोमे ध्यानं तु नामसं॥९०॥ सोध्यायो दस्युरेः कुर्याज्जपं च ननत्वर्पाति॥ कल्यां माप्निलमं तु हेध्या
ये हृष्वं च नामसे॥९१॥ अथ वक्ष्याणि काम्यादौ संपूज्या मान्त्र देवता॥ नित्यं समर्चये द्विप्रं वारेशो च तिथी
श्वरं॥९२॥ नक्षत्रेशं ततः पूज्यान्त्रं अन्यकर्माधि देवताः॥ नतोर्चयेदिहृदेवं नमो होमं समाचरेत॥९३॥ अमाद्वा
रेश्वरो सूर्यश्शिवो सोमो विकेतथा॥ ग्रहांगारौ हविल्स च चतुर्वेक्रं वृहस्पती॥९४॥ अर्के जोशनि कालो च
सूर्याद्यो द्रष्ट नाम च॥ ब्रह्मा विधाता विष्णुश्च यमः श्री नकरो गत॥९५॥ इंद्रश्च वसवो नागा धर्मः शिवदिवा
करौ॥ कंदर्पश्च कलिर्विश्वे देवाश्च पितरस्तथा॥९६॥ अश्विनौ च यमो वान्हि र्ब्रह्मा चंद्रः शिवो दितिः॥ गुरुः स
र्पाश्च पितरो भगो र्यम दिवाकरौ॥९७॥ त्वष्टा वायुरथेंद्राग्नी ह्योपित्रश्च सुरेश्वरः॥ निर्ऋतिश्च जलं विश्वे
देवाश्चापि विधि र्हरि॥९८॥ वसवो वरुणो जैकपादो हिर्बुध्न पूषकौ॥ नक्षत्रेशाइमेश्याभिजित्का अष्टौ
चविंशति॥९९॥ पूर्णा वादि चतुर्थ्यं तानमसार्व समपिन्निना॥ एतेषां नाममंत्रात्मकया स्याः पूजादिसाधने॥१००
सिद्धमंत्रः प्रकुर्वीत काम्य कर्माणि नान्यथा॥ क्रूराणि विपरीतानि भूत्वा निरयमाप्नुयात॥१॥ गुरुभक्तिः
शुचिः स्नातः काम्यकर्मविधान वित॥ आत्मनश्च परस्यापि काम्यकर्माणि चाचरेत॥२॥ षट्कर्माणि परार्थे
च कुर्यान्मंत्रवित्तमं॥ एतेषामेव कुर्वीत नान्येषां तु कदाचन॥३॥ राज्ञो वा राजपुत्रस्य धनाढ्यस्य नरस्य वा

आस्तिकस्यानिभक्तस्य न्यायार्जितधनस्य च ॥ ४ ॥ कृतज्ञस्य वदान्यस्य गुरुदेवार्चकस्य च ॥ सुशीलस्य सुभक्तस्य कार्यं कुर्याच्च देशिकः ॥ ५ ॥ राजाकारयिता यो वा साधकं प्राणिपस्य च । वृण्याच कर्मकर्तारं दीक्षोक्तविधिना ततः ॥ ६ ॥ साधकः प्रयतो भूयात्सम्यक्संतोषवान्शुचिः । जितेन्द्रियो जितक्रोधो मानक्षोभविवर्जितः ॥ ७ ॥ त्रिस्यनैमित्रिकरतः कुर्यात्काम्यान्यनेकधा ॥ क्रूरकर्म यथोक्तं तु कृत्वाप्यंगं समाचरेत् ॥ ८ ॥ स्नात्वा पावरतां सांगां पूजयेदिष्टदेवतां ॥ अष्टोत्तरसहस्रं तु रक्षार्थं प्रजपेत्ततं ॥ ९ ॥ मां रक्ष रक्षेत्युक्त्वा च नत्वा देवं सम्पूजतेन ॥ अन्यैः सुहृद्भिः सामिन्धैरात्मरक्षां तु कारयेत् ॥ १० ॥ मृत्युंजयादिभिर्मंत्रैः सूर्यलेवार्घ्यदानकैः ॥ जपहोमार्चनाद्यैश्च ब्राह्मणाराधनादिभिः ॥ ११ ॥ प्रयोगकरणं सम्यग्गुरुतः शास्त्रतस्तथा ॥ ज्ञात्वा प्रयोगान्कुर्वीत नान्यथा दुःखमाप्नुयात् ॥ १२ ॥ ततः कारयिता राजा तोषयेत्साधकं धनैः ॥ प्राणिपत्य गुरुश्चा विध्यास्यानुहिमांस्तथा ॥ १३ ॥ सिद्धमंत्रस्य सिद्ध्यन्ति षट्कर्माणि न संशयः ॥ नैवसिद्धं यस्य सिद्धस्य देवताशापमाप्नुयात् ॥ १४ ॥ काम्यप्रयोगकरणं परयोगेन विद्यते । प्रयोगसिद्धिरेवैषां फलमन्यन्न विद्यते ॥ १५ ॥ होमं तर्पणं मंत्राद्यैर्नानाध्यानविशेषकैः । आत्मनश्च परस्यापि षट्कर्माणि समाचरेत् ॥ १६ ॥ एकलक्षं जपेन्मंत्री ध्यानविन्यासयोगतः । प्रयोगदोषशांत्यर्थं आत्मरक्षार्थमेव च ॥ १७ ॥ नचेत्तत्फलमाप्नोति देवताशापमाप्नुयात् । शक्तिप्रभाधूमवतां ह्याभिगंधाशिवोक्तानि ॥ १८ ॥ दूतवेश्यादिकं ज्ञात्वा कथयीत शुभाशुभं ॥ मंत्रतत्वानुसंधाने देहावेरूपादिलक्षणं ॥ १९ ॥ गुरुभक्तिः सदा कार्या कर्मकाले विशेषतः

ऐहिकामुष्मिकानां च गुरुदेवपरायणां ॥ २० ॥ मारणोच्चाटनादीनि क्रूराणां काममार्गिणां ॥ क्षुद्रदेवाः साधयंति सि
द्धं तुं मनेक्षमा ॥ २१ ॥ परनिष्ठापराणां तु वामीनां परनाशनः । यावद्देहं तावद्देवत्वं निष्ठाधनादिकं ॥
२२ ॥ दक्षिणानां त्वानकुर्वन्निकदाचिदपि ऽहृतं ॥ अधिकारादिलोभार्थं कदाचिदाचरंति ते ॥ २३ ॥ तेषां प
नौर्वं शुद्धिः परलोकप्रणाशनः ॥ ये कुलद्वयसंभ्रष्टाः कल्पोक्तेनैव संस्कृताः ॥ २४ ॥ तेचैवत्रिपतितावा
मेया सर्वं किमतः परं ॥ इयं प्रोक्ता नराचर्या किमन्यच्छ्रोतुमिच्छसि ॥ २५ ॥ इति श्रीमत्तन्मायामत्त
कालानुमते पेतन्त्रे शिवप्रणीते निरिद्धिष्टिरीकरणप्रकाशः सप्तमः ॥ ८५० ॥ श्रीदेव्युवाच ॥ मुद्राणां
लक्षणं ब्रूहि याश्चान्या वामदक्षिणे ॥ सर्वदेवप्रिया याश्च पूजासाफल्यदायकाः ॥ १ ॥ शिव उवा
च ॥ वक्ष्येथमाम पूर्वाणि मुद्राणां लक्षणानि तु ॥ नित्यं यः कुरुते सर्वा देवाः स्युस्तस्य सौख्यदाः ॥ २
अंकुशाख्या भवेन्मुद्रा पद्धेनामाकनिष्ठयोः ॥ अंगुष्ठतर्जनी वक्रा सरला चापि मध्यमा ॥ ३ ॥ साकुं
भमुद्रा हस्ताभ्यां सावकाशो निबध्यते यत्रैकमुष्टिरंगुष्ठो दक्षो वामं समाश्रितः ॥ ४ ॥ वह्निप्राका
रमुद्रा तु त्रिशूलाग्रा तु भौ करौ ॥ व्यस्तलावामिलो व हे तपेदत्ता हृयापि च ॥ ५ ॥ अंगुलिस्पाससमु
द्रास्यात्पंचांगुल्यः स्पर्शनक्रमात् ॥ अंगुष्ठेन च तन्मन्स्कमर्जन्यांगुष्ठमेव च ॥ ६ ॥ हृदयाख्यो भवे
न्मुद्रांगुष्ठवर्जं प्रसारिताः ॥ चतस्रोंगुलयो म्लाहृदयेनप्यपंगनः ॥ ७ ॥ शिरोमुद्रानुशात्तेयात

98

लेपारो: प्रसारितं ॥ वनस्योंगुलयश्चापि प्रसार्य शिरसा धृता ॥ ८ ॥ शिखामुद्रानमस्कारे यामुष्टिं वाग्र ष्टपल्लवं ॥ वद्धाते
नशिखावद्धा। शिखामंत्रेण साधकैः ॥ ९ ॥ कवचाख्यात्वियंमुद्राऽयंगुल्यः कृतमालिका ॥ स्कंधादानाभिपर्यं
तंपाणोत्क्रप्रक्रमाऽवेत ॥ १० ॥ त्रिनेत्रमुद्राख्याता त्रेयं तर्जनी दक्षनेत्रगा ॥ भाले मध्या त्वनामा तु वामेऽप्य
क्षिदिवौकसां ॥ ११ ॥ द्विनेत्रमुद्राख्याता त्रेयं तर्जनी दक्षनेत्रगा ॥ मध्यमा वामनेत्रे च सूर्यविम्बादिभेदको ॥ १२ ॥
अस्त्रमुद्रा समाख्याता सर्वारिष्टनिवारिणी ॥ अंगुष्ठतर्जनीभ्यां तु हस्तयोरभिघातकृत् ॥ १३ ॥ नित्ये नैमि
त्तिकेष्वेताः अंगवक्त्रस्य मुद्रिकाः ॥ अथ काम्ये प्रवक्ष्यामि मुद्राणां तु लक्षणं ॥ १४ ॥ हृन्मुद्रास्यादियं
काम्ये तथा शैवागमेषु च ॥ कृतमुष्टिपदे हस्ते कृत्वांगुष्ठौ हृदि न्यसेत् ॥ १५ ॥ शिरोमुद्रा तलाग्रे
कृतमुष्टिपुटे करौ ॥ कुर्याद्द्वंद्व प्रसन्नाग्रे तर्जन्योऽंगुष्ठवाहृत ॥ १६ ॥ शिखामुद्रा करौ युक्तौ कृतमु
ष्टिपुटाकृती ॥ ज्येष्ठे त्वधः प्रसन्नाग्रे कनिष्ठे तूर्द्धतः स्थिते ॥ १७ ॥ कवचाख्या प्रसन्नाग्रा वंगुष्ठौ च त्रि
कोणवत् ॥ तर्जन्यो नां नयेन्मूर्द्धि मुखे पार्श्वे करे हृदि ॥ १८ ॥ नेत्रमुद्रा नु सरला मध्या तर्जन्यनामिके
धनुषाभे संप्रसन्नाग्रावंगुष्ठककनिष्ठिके ॥ १९ ॥ अस्त्रमुद्रा करं बद्ध्वा स्फोटश्चापि तदुत्तरं ॥ तर्जन्याश
द्वयेनाभ्यां ज्येष्ठाग्रव्रातिन्नाप्रया ॥ २० ॥ गालिनि तु कनिष्ठांगुष्ठौ मुनाथितरेतरं ॥ करयोस्तर्जनी म
ऽनामाभ्रमाऽनवक्रिता ॥ २१ ॥ धेनुमुद्रा कनिष्ठानामिके चान्योन्य हस्तयोः ॥ तर्जनी मध्यमे चापि द

अस्त्रं धेनुं दर्शयेत ॥२२॥ शंखमुद्रा तु वामात्वमंगृष्ठं दक्षमुष्टिगं ॥ वामांगुल्यपुदक्षांगुष्ठस्य योजे तु जायते ॥२३
योनिमुद्रान्योन्यकरकनिष्ठानर्जनियुतिः ॥ व्यस्तनन्त्रलग्नः शेषांगुल्या च गृह्य भाषिते ॥२३॥ मत्स्यमुद्रा चोपु
रवं तु वामहस्तं तदूर्द्धतः ॥ तादृशं दक्षिणं तस्यां पृष्ठको चालयेदिति ॥ २४ ॥ आवाहनी तु मुद्रा स्यात्कराभ्यां
मंजलीं चरेत ॥ अनामयोर्मूलपर्वस्पं गृष्ठोतिः क्षिपेत्तदा ॥ २५ ॥ स्थापनि सा तु मुद्रा स्यात्सा चावाहनमुद्रिका
न्यधोमुखी कृता सा चेत्तदा वै संस्थापनसमा ॥ २६ ॥ संमुखीकरणी मुद्रा सा हेयामुष्टियुग्मके ॥ उत्तानं स्थाप
तेयस्यामंगुष्ठद्वयमुन्नतकं ॥ २७ ॥ सकलीकरणी मुद्रा सा प्रोक्तायः षडंगके ॥ देवानां क्रीयते न्यासो हृदंगाना
मंगिनैका कृता ॥ २८ ॥ अवगुण्ठनमुद्रा तु दीर्घाधोमुखतर्जनी । मुष्टिबद्धस्य सव्यस्य हस्तस्य धामयेत्ततो
२९ ॥ महामुद्रा समुद्दिष्टा परमीकरणो त्वियं ॥ अन्योन्यग्रथितांगुष्ठा प्रसारितकरांगुलि ॥ ३० ॥ सन्निधाप
नमुद्रा स्याद्योगो मुष्टिद्वयस्य तु ॥ सम्प्रकुरभयोर्जोत्रलग्नांगुष्ठावुच्छ्रितौ यदि ॥ ३१ ॥ संरोधनीति सा मुद्रा मुष्ठा
रंतःप्रवेशितौ ॥ द्वावंगुष्ठौ मुष्टियोगोविच्छिडम्बेडवेशादि ॥ ३२ ॥ दंतमुद्रा गतोशस्य वक्त्रभाद दक्षहस्तजा ॥ उ
त्तानोर्द्धमुखी मध्या सरला वद्धमुष्टिका ॥ ३३ ॥ पाशास्त्र्यान्तु वामस्य तर्जन्यां दक्षतर्जनि ॥ क्षिप्त्वावधामु
ष्टियुगं तर्जन्यंगुष्ठयोर्यदि ॥ ३४ ॥ विघ्नमुद्रा दीर्घरूपा मध्यमा चोमुखा यदा ॥ तर्जनी मध्यमा संस्था निर्गतां
गुष्ठमुद्रिका ॥ ३५ ॥ परशोमुष्टिमवेमुद्रा तिर्यकूर्सयोऽपचांगुली ॥ प्रसृतास्ये युताहमतलेह समतलान्वितं

११

३६ ॥ लङ्काख्या भवेन्मुद्रा कुर्द्धस्यं दक्षिणांकरं ॥ अंगुष्ठो विरला न स्यान्निम्नं करतले तथा ॥ ३७ ॥ वीजपूराह्वया वाममुष्टा
वृत्तानके सति ॥ देवाद्या षट्कोणस्थां कृष्णमुद्रा च सप्तमी ॥ ३८ ॥ वराख्याधान्मुद्रा स्यादतिसन्निहिताङ्गुलिं ॥ उत्तानं
दक्षिणां हस्तं कृत्वाधो नामयेच्छनैः ॥ ३९ ॥ अभयस्यानुमुद्रैषा कथिता वामपद्मदा ॥ पराङ्मुखं वामहस्तं उद्धिताङ्गुलि
कं यदा ॥ ४० ॥ खड्गमुद्राङ्गुष्ठवद्धानामिका सकनिष्ठिका ॥ दक्षहस्तस्य मुद्रा च तर्जनी मिलने युते ॥ ४१ ॥ चर्ममुद्रा वा
महस्तं तिर्यक् कृत्वा प्रसार्य च ॥ आकुंचितगतिक्रियादियं शार्ङ्गिप्रिया मता ॥ ४२ ॥ धनुर्मुद्रा वाममध्याग्रे तर्जन्यग्र
योजितं ॥ वामस्कंधे कनिष्ठाग्रे दक्षांगुष्ठेन पीडनं ॥ ४३ ॥ मुशलाख्यो भवेन्मुद्रा वामस्योपरि दक्षिणां हस्तयोर्मुष्टि
युगलं कुर्यात्सा विघ्ननाशिनि ॥ ४४ ॥ दुर्गामुद्रा तु करयोर्मुष्टिं कृत्वा त्रियोजयेत् ॥ वामस्योपरि दक्षं च शिरसि स्था
पयेदिति ॥ ४५ ॥ वाममुद्रा दक्षमुष्टेस्तर्जन्या दीर्घया भवेत् ॥ अष्टौ वराद्याः पाशश्च कुशः शङ्खो देशस्थिता : ४६
चक्रमुद्रा करतले विपरीते विधाय च ॥ अंगुष्ठौ रचयेच्चैव कनिष्ठानामिकान्तरे ॥ ४७ ॥ गदानुसरतो हस्तावन्यान्य
न्यथितांगुलि ॥ अंगुष्ठौ मध्यमे भूयः संलग्ने सप्रसारिते ॥ ४८ ॥ पद्ममुद्रा करतले त्वंगुष्ठौ मीलितौ यदा ॥ हस्तौ तु
संमुखौ कुर्यात्संहतावुन्नतांगुलि ॥ ४९ ॥ वेणुमुद्रा वामदक्षकनिष्ठांगुष्ठयोगतः ॥ वामांगुष्ठो धरेशेषा वक्रा
श्चोर्द्धं कनिष्ठिका ॥ ५० ॥ श्रीवत्सा मध्यमानामेंगुष्ठवद्धौ करौ युतौ ॥ कनिष्ठयो मूलगते तर्जन्यौ भवतो यदि ॥ ५१
कौस्तुभा मध्यमानामांगुष्ठाकुर्द्धमुखा युता ॥ कनिष्ठातर्जनीग्रंथिस्थाप्येतिर्यङ्मुखौ करौ ॥ ५२ ॥ वनमालाह्व
यामुद्रा तर्जन्यंगुष्ठनिष्ठया ॥ करद्वयेन मालावत्कण्ठादाकराठपादकं ॥ ५३ ॥ ज्ञानमुद्रा हृदिन्यस्तौ तर्जन्यंगुष्ठ

|| मे·तं ||
|| १०० ||

कौस्तुभो || वामहस्तो भुजं वामजानुमूर्द्ध्नि विन्यसेत ||५४|| बिल्वाख्या दक्षिणांगुष्ठं वेष्टितं वाममुष्टिनं || अन्योन्य
हस्तांगुलयो निविष्टाः स्थापयेद्धृदि ||५५|| मुद्रा गरुडस्य हस्तकौ विपरितौ यथितेकनिष्ठिके || तर्जन्यपि स
युग्मापि थपदनुत्पाद्य भयांगुली भ्रमरौ ||५६|| नृसिंहमुद्रा त्विबुकाधरौ तु जान्वोर्मध्ये थकरौ कलम्बो ||
चेत्कंपते मा जम्भत्वात्प्यजिह्वा संलेलिहाना नयने त्रिभीमे ||५७|| कुशनातरेः सर्वांगं स्पृष्टे दर्घोभ्भावा
ः अंगुष्ठाभ्यां च करयोराक्रमेत कनिष्ठिके ||५८|| वाराही दक्षमुष्टानं सुदृढं वामं नहर्द्धतः || अंगुल्यग्राणि सं
योज्या धरणीं संनामयेद्दिति ||५९|| हयग्रीवा दक्षमहस्तस्यांगुल्यस्य धो मुखो || तद्वाम मध्यमया मध्यं नाम
येदन्ति साभवेत ||६०|| कामाख्या संपुटो हस्तौ मध्यमापृष्ठगे यदा || तर्जन्यौ मध्यमासंमध्यमंगुष्ठयुगलं तथ
दि ||६१|| त्रैलोक्यमोहनि मुद्रा मूर्द्धि अंगुष्ठकनिष्ठिके || चक्राग्रांश्च धनु वीणापर मध्ये हरेरिमाः ||६२|| बिंब
मुद्रा करौ प्रसतिभौ श्लिष्टे च मध्यमे || अंगुल्यौ धारयेत्साक्षिनं पयाग्रे संप्रदर्शयेत ||६३|| सौरमुद्रा वाम
हस्त मध्यमाङ्गुष्ठो न्यासं तर्द्धतः || कमलाकृति मुद्रा स्यादुभे मौ भास्करप्रिये ||६४|| लिंगमुद्रा दक्षिणांगुष्ठं वा
मांगुष्ठेन चेष्टयेत् || वामांगुल्यो दक्षिणाभिर्वेष्टयेत्स्याच्छिवप्रिया ||६५|| योनिर्मुद्रा तर्जनिभ्यां कनिष्ठे स
म्यग्वद्धे मध्यमानां पि वेव || संश्लिष्टे तु तर्जन्यौ पृष्ठभागेनामिकाभ्यां मर्दितेवेन्नदये ||६६|| त्रिशूलाख्या
भवेन्मुद्रांगुष्ठेन कनिष्ठिकां || बध्वा प्रसारयेच्छेषमंगुलीनां त्रयेत् तदा ||६७|| मालामुद्रा गुष्ठतर्जन्यग्र

100

|| राम: ||
|| १०० ||

६१

पयेद्दृढं ॥ प्रसारयेदंगुलीनां त्रयं जपमुद्रासिद्धये ॥ ६८ ॥ वरमुद्रा दक्षहस्तं प्रसार्याधोमुखं कृतं । तदा भवेदकस्माद्वेला
दृष्टा धनदायिका ॥ ६९ ॥ अभयाख्या भवेन्मुद्रा वामहस्ते प्रसारिते । ऊर्द्धकृते भये दृष्टा स्वप्नादौ भयनाशिनी ॥ ७०
मृगमुद्रा तर्जनी च कनिष्ठा चोच्छ्रिताग्रका । अनामिकांगुष्ठमध्याग्राणि तिर्यग्गुतानि च ॥ ७१ ॥ खट्वांगमुद्रा सङ्गुका
।शिवस्यातिप्रिया भवेत् । पंचांगुल्यो दक्षिणाष्ठे मीलिता ऊर्द्धमुच्छ्रिता ॥ ७२ ॥ कपालिनी भवेन्मुद्रा वामांके
वामहस्तकं । स्थापयित्वा पात्रवत्कुर्यात्सा भैरवप्रिया ॥ ७३ ॥ डमरुः शिथिलां मुष्टिं कृत्वा मध्यां समुन्नतां ।
प्रचालयेत्कर्णपार्श्वे दर्शिताः भूलिनो मता ॥ ७४ ॥ आसनाख्योपरमुद्रा सूपविष्टैः सुखासने । स्वस्वजा
नुस्थितौ हस्तौ कलिकाभावधोमुखौ ॥ ७५ ॥ कुशलाख्या भवेन्मुद्रा करावुत्तानितौ यदि । अंजलितो फला
कारौ स्वस्वदिग्भागसंस्थितौ ॥ ७६ ॥ स्वागताख्या भवेन्मुद्रा विनम्यं तरगो करौ । उत्तानावूर्द्धदेशस्थाल
भौ नम्रस्तथा प्रमानत ॥ ७७ ॥ अर्घ्यमुद्रा तु सा ज्ञेया दत्तौ निष्ठिडगुवच । अंजलिस्त्यपदावद्धांगुष्ठौ कर्णौव
दाश्रितौ ॥ ७८ ॥ पाद्यमुद्रा ह्यर्घ्यमुद्रासमा यंत विशेषकः । अंगुष्ठतर्जनीयोग कर्त्तव्यो हस्तयोर्द्वयो ॥ ७९
मुद्राचमनसंज्ञा मुनिश्लेकरतले युना । हीनाकनिष्ठया निसोगुष्ठाग्रं तर्जनीयुतं ॥ ८० ॥ मधुपर्कस्य मुद्रा स्या
दियं चाधोमुखा यदि ॥ अनामिकांगुष्ठयोश्चैदग्रयोगः प्रजायते ॥ ८१ ॥ स्नानमुद्रा दक्षहस्तमुष्टिः स्याद्वेद
धोमुखी । कनिष्ठया विमुक्ता चेत्स्यान्नैवं तत्फलप्रदा ॥ ८२ ॥ वस्त्रमुद्रा दक्षहस्तं कृत्वोत्तानं तव मध्यमां । अंग

ष्ठेनस्पृशेद्देवादानेवस्त्रस्यधारणे॥८३॥आभूषणस्यमुद्रातुकीर्तिताचेयमेवच॥अंगुष्ठमध्यमायोगःकर्तव्यइ
तिशिष्यते॥८४॥उपवीतस्यमुद्रास्यात्कनिष्ठांगुष्ठयोगतः॥उपवीतस्यकरणादिकेमगलितधारणे॥८६॥पुष्पा
ख्यातुभवेन्मुद्राहस्तंचाधोमुखंकुरु॥ततःस्पृशेत्तथांगुष्ठाग्रंसंयोज्येतिपूजने॥८७॥धूपमुद्रातुदेवादिधूपनेसं
प्रकीर्तिता॥अंगुष्ठाग्रेणतर्जन्यास्पृशेदग्रेचपूर्ववत्॥८८॥दीपमुद्राप्रोच्यतेथदीपेसर्वप्रियंकरि॥ज्ये
ष्ठाग्रेणस्पृशेदग्रंमध्यमायाश्चपूर्ववत्॥८९॥नैवेद्यमुद्रादेवानांपूर्ववत्परिकीर्तिता॥विशेषोनामि
काग्रेतुज्येष्ठाग्रेणतुयोजयेत्॥९०॥ग्रासमुद्रासव्यहस्तेप्रफुल्लकमलाकृतिं॥दर्शयेत्वंचवापूनामुचं
नेयंचपुडिका॥९१॥प्राणमुद्रामथोवक्ष्येभोजनादौप्रदर्शयेत्॥कनिष्ठानामिकेसम्यंगुष्ठाग्रेणयो
जयेत्॥९२॥मुद्रायानस्यविज्ञेयातर्जनीमध्यमयोयुतौ॥एतदर्शनतःवायुरोधाद्रोगीविमुच्यते॥९३
व्यानमुद्रातुसाज्ञेयामध्यमानामिकेयुगे॥समस्तदेहगोवायुर्दृष्ट्वानासंप्रसीदति॥९५॥समानगा
योमुद्रास्याद्यदापंचांगुलीयुतिः॥प्राणादिचतुर्थ्यंतानमोंतानाममंत्रकाः॥९६॥सप्तजिह्वाख्यमुद्रा
तुप्रसन्नांगुलिकौकरौ॥कनिष्ठांगुष्ठयुगलंमणिबंधौचसंयुतौ॥९७॥मुद्राभूजवलेप्रोक्तासर्वांगु
लिसमागमा॥अंतश्चमुष्टिरेहस्तेकाकतुंडनिभेमुखे॥९८॥नाराचाग्रेवामहस्तपृष्ठेदक्षंसमानयेत्
शनैःशनैश्चसरलेतर्जन्यौवंधिताःपराः॥९९॥संहाराख्याधोमुखौवामहस्तोदक्षोर्ध्वासोग्रथितांगुलःएव

पर्यस्तौ चेद्द्वौ करौ स्यात्त्रिसर्गवल्यादीनां देवतानुग्रहकर्त्री ॥ ९०१ ॥ अशनिर्नाम सा मुद्राङ्गुष्ठस्या वामतर्जनी ॥ अधोवक्त्रा
परा तत्र संयुक्तादिविनाशिनी ॥ १ ॥ कालकर्णी भवेन्मुष्टेरङ्गुष्ठवृत्तनौ यदा ॥ पार्श्वयोश्चापि संलग्नौ तावेवाभिमुखौ
तदा ॥ २ ॥ मुद्राविषयसंज्ञा स्याद्धिसप्यावेशकारिणी ॥ दक्षिणानिविडामुष्टिनांलिकार्पिततर्जनी ॥ ३ ॥ नादमु
द्रा तर्जन्याङ्गुष्ठावङ्गुष्ठकोयदि ॥ निवद्धौ यतिनां सेयाव्रत्साभिव्यक्तिकारिणी ॥ ४ ॥ विन्दुमुद्राङ्गुलिभिश्चेन्मु
द्रावद्धानमुष्टिकां ॥ तर्जन्यङ्गुष्ठसंयोगः पूर्णाकर्मणि योजयेत ॥ ५ ॥ प्रार्थनाख्या भवेन्मुद्रा हस्तौ कुर्याद्धृदि
सके ॥ प्रसृताङ्गुलिकौ हस्तौ मिथः श्लिष्टौ च संमुखौ ॥ ६ ॥ लक्ष्मीमुद्रा परा ह्येषा सर्वसंपत्प्रदायिनी ॥ हस्तौ समं
भुग्नौ कृत्वा प्रसृताङ्गुलिकौ तथा ॥ ७ ॥ अत्राव्यमुद्रिका हस्तौ नाभिदेशे प्रसार्य च ॥ अधोमुखौ नयेत्स्कंधे त
र्जनीभ्यां तथा नदा ॥ ८ ॥ दंष्ट्रामुद्रा चक्रमुद्रा पादौ कृत्वा प्रपीडयेत ॥ मध्यमे तर्जनीभ्यां तु सर्वपातकनाशि
नी ॥ ९ ॥ भवेत्सलकमुद्रा तु दक्षहस्तः प्रसारितः ॥ नाभ्यग्रे चांतरिक्षे वस्थापि तश्च निरीक्षितः ॥ १० ॥ गजकर्णी
ख्यमुद्रा तु हस्तयोः पृष्ठमेलनं ॥ कृत्वा चोर्द्धमुखौ हस्तग्रेथिरंगुष्ठयोर्भवेत ॥ ११ ॥ वह्नस्यालनमुद्रा तु कनिष्ठा
वामतर्जनी ॥ मध्यमानामयोरग्रे भूतं हृष्टे तत्तद्वयं ॥ १२ ॥ वापीमुद्रा दक्षमध्यानामयोरर्द्ध वामतर्जनः ॥ ज्येष्ठाक
निष्ठा दक्षस्यात्तयोरर्द्धतवामजे ॥ १३ ॥ शाकलख्या भवेन्मुद्रा तर्जनिभ्यां सनापिके ॥ अन्योन्यं मध्यमयोः पृष्ठा
न्मध्योपरि निपीडिते ॥ १४ ॥ गायत्र्यास्त्वथ वक्ष्यन्ते चतुर्विंशतिमुद्रिका ॥ जपादौ दर्शयेत्तासां देवतास्तु तथा फलं १५

पृष्ठवंसे हस्तौ तलावश्यानांकुंचितांगुली ॥ मुक्तादिनी तत्र शक्तिः साधकानंददायिनी ॥ १६ ॥ संपुटं पंचकोशाभो क-
रावस्योन्यसंहतौ ॥ तस्य शक्तिर्नित्यविख्याता विश्वस्यापि प्रियंकरी ॥ १७ ॥ विन्वतं संहतौ हस्तावृत्तानाचायतौगुली
हृदयानामतच्छक्तिः सर्वेषां हृदयंगमा ॥ १८ ॥ विलीरौ संहतौ पाणी पि योजितौ गलिहयं शक्तिस्तु विमला
तस्याः प्रभावादत्रछोभवेत ॥ १९ ॥ द्विगुणौ कोहलयोस्क संपुटं सक्रयोर्द्वयोः ॥ कनिष्ठयोरेव योगः शक्तिः
स्तस्याः सदाशिवा ॥ २० ॥ त्रिपुटौ रव्यौ हस्तयुग्मं संसक्तं नामिकाद्वयं ॥ संयुतं श्रोत्रमंगुल्यो भिन्ना शक्तिः प्रभा-
वती ॥ २१ ॥ चतुर्मुखौ हस्तानयुग्मं संसक्तमध्यमा युतिः ॥ शेषांगुल्यस्तु संभिन्ना लोना शक्तिः प्रकीर्तिता ॥ २२
पुटापंचमुखौ तत्र तर्जन्योर्यत्र संयुतिः ॥ अपरांगुलयोपि भिन्ना शक्तिः शांतिश्शांतिकृत ॥ २३ ॥ भवेत्स्वषण्मु-
खपुंडासास्यं पूर्णांगुलियोजनं ॥ कनिष्ठाद्विनयं हित्वा शक्तिरीशा प्रकीर्तिता ॥ २४ ॥ अधोमुखं नाम मुद्रा
मुद्रे हस्तौ अधोमुखौ ॥ आकुंचितायो संयुक्तो शक्तिरस्याः सरस्वती ॥ २५ ॥ व्यापिकांजलिकं नाम मुद्रा हस्तौ
तु नादृशौ ॥ विशेषोत्र तु वा नामो विश्वरूपात्र देवता ॥ २६ ॥ शकटं नाम मुद्रा सा व्यत्यस्तांगुलिकौ करौ ॥ अ-
धोमुखौ च ऊर्ध्वपृष्ठौ विशालाक्षी शक्तिरत्र तु ॥ २७ ॥ यमपाशं तु ऊर्ध्वपृष्ठौ करयोर्ग्रथितौ यदा ॥ तर्जन्यो तत्र तला-
गौ वामो लेपात्र देवता ॥ २८ ॥ ग्रथितं नाम मुद्रा सौ न्यसेषिलग्नाश्चांगुलयो यदि ॥ उत्तानौ चौच्छ्रितांगुष्ठ वाशा-
शक्तिस्समीरिता ॥ २९ ॥ सन्मुखो मुखवत्पुटानसंवृतौ ग्रथितांगुलि करौ ॥ दक्षिणाधो मुखौ वाम उर्ध्वं मुखार्थ्यं भवेत

102

३०॥ विलंवे नाम सा पुजाचौ क्षानो त्तनकोटिकौ ॥ यस्या करौ तु विमला तस्याः शक्तिः प्रकीर्तिता ॥३१॥ श्रीष्टके तु
यदा मुष्टी भवतोन्योन्य संपुते । उक्ता नौ तु करौ तत्र शक्तिः प्रोक्ता तमोमयी ॥३२॥ मत्स्यपल्कसंपुटौ भवतो युक्ताना
मकनिष्ठिकौ ॥ कुंडसंयुक्तवक्त्राग्राः शेषाः शक्तिर्हिरण्मयी ॥३३॥ कूर्मा त्वधोमुखो हस्ता मध्यमा हृदसे तापृष्ठके
समाक्रांता तस्य शक्तिः सूक्ष्मा सूक्ष्मार्थसाधिका ॥३४॥ वाराही दक्षिणास्योर्द्ध वामपुता नकंकरं ॥ स्थापयि
त्वा घोणवंतत्रामध्ये हि दिव्ययोनिका ॥३५॥ सिंहाक्रांते नाम भुजशंखलौ वेदायतांगुली ॥ दंष्ट्रौष्ठवक्त्रायोगतः हृद् शक्तिरस्या
नयावहा ॥३६॥ महाक्रांते तु नाम भुज प्राग्वदाकं विनायकौ ॥ करौ कर्णास्थितौ शक्तिः प्रोक्ता पद्मालयाभि
धा ॥३७॥ मुद्रां किंचिदूर्द्धे तु ताततयो वामतर्जनी धृत्वा दक्षिणहस्तेन पद्माशोभाग्यदेवता ॥३८॥ पद्मवाप्याम
वेन्मुद्रा स्याद्गल्पः पंचवीक्षताः ॥ देवाग्रे दर्शयेच्छक्तिगणदारूपानि कीर्तिते ॥३९॥ नत्वा तु दर्शयेन्मुद्रां महाजन
समागमे ॥ मुद्रांति देवतास्तस्य विफलं तु कृतं भवेत् ॥४०॥ यथा कालस्याभिनयं दृष्ट्वा हृष्यंति मानवाः ॥ त
थाभक्तकृता मुद्रा दृष्ट्वा हृष्यंति देवता ॥४१॥ उत्तराम्नायसंप्रोक्ता देवा कृष्यंति वै चमैः । मुत्रःपदार्थ
एकश्चोत्साधकनइपांति च ॥४२॥ पश्चिमाम्नायदेवानां मुद्राणां तं कृता कृतं ॥ मचतु हृपमिच्छंति तं विना
हि शापंति च ॥४३॥ पूर्वाम्नायोक्त देवानां तत्सांसं च कृता कृतं ॥ आवरणकमंत्रपंचतंविना पुजापांति ते
४४॥ उर्द्धाम्नायोक्त देवानां नैमत्स्याश्च कृताकृतानः ॥ आवरणंकं मद्यं चावेनातं प्रइायंति ते ॥४५॥ दक्षि
णाम्नायदेवानां त्रिविद्यं मद्यं च हृदयं ॥ मेनैकेन विनाते पित्ताइ पांति हि साधनं ॥४६॥ तस्यां मुद्राः शिक्ष

णीयाः संप्रदायानुसारतः ॥ सर्वत्रमोदं लभते भुजा विनात्र संशयः ॥ ९७ ॥ इतिते सर्वमाख्यातं सर्वतंत्रेषु गोपितं ॥ मुडारांपरमं तन्त्रं किमन्यच्छ्रोतुमिच्छसि ॥ ९८ ॥ इतिश्रीमहामायामहाकालज्ञमतेमेरुतंत्रे शिवप्रणीते भुडालसांप्रकाशोष्टमः ॥ १००० ॥ श्रीदेव्युवाच ॥ प्रयोगाम्बरतो केनपरार्थानेहतो व्येभाक ॥ सिद्धिर्थी च कलौ शिव्योधनार्थी नरेव च ॥ १ ॥ पूजनार्थे नलभ्यादेवा शिवपार्थे तथा मतः ॥ तस्मादैहिकीसिद्धिः पारकीयी कथं भवेत ॥ २ ॥ तस्मात्कश्चिडमायः स्मात्सुरश्चर्यादिकं विना ॥ परत्रेह च सिद्धिः स्याद्दिना निंदंवदस्वनन्द ॥ ३ ॥ ईश्वर उवाच ॥ आयांति गच्छति भुवने सर्वे त्वं ये सर्वतंत्रभिः ॥ तेमदेशक्रमात्तथा आगमपाठ्काः प्रकीर्तिता ॥ ४ ॥ कलेसहस्रच्छितवर्षेसार्द्धे देवाधदागतं ॥ सर्वदेवगणौ स्वकं तदानृपशिवीतलं ॥ ५ ॥ वेदो नारायणाः साक्षात्संस्थास्यन्त्वयुनावधि ॥ आगमेस्मिन्देशे सोप्यगम्यो भविष्यति ॥ ६ ॥ उद्धारायच साधूनां महाकालान्तया मया ॥ कथितं चिरजीवी स्यात् पार्थिवंपलिंगपूजनं ॥ ७ ॥ तद्विधिं संप्रवक्ष्यामि देवाः श्रावेनु सादरं ॥ इहलोके परत्रापि सिद्धिः करतले स्थितिः ॥ ८ ॥ तत्र पार्थिवलिंगानां पूजने स्थाद्दये विधिः स्नात्वा नित्यविधायादौ गच्छेत्कुद्रांभवं सुधीः ॥ ९ ॥ स्थानानि केत्स्थिता याम्यत्साम्मा सर्वार्थसिद्धिदा ॥ श्मशाने गर्भेऽश्वत्थमूलेनदीकूले च निर्जने ॥ १० ॥ पर्वताग्रेष्वतीर्थे च गोष्ठे वा न लसीवने । वराधसात्तत्र मूर्तिंमें त्रयेत्साधयेदपि ॥ ११ ॥ म्होदधिध्येन म इति मंत्रः प्रोक्तः षडक्षरः ॥ अनेन पूजयेत्वागध

103

रणीं प्रार्थयेदिति ॥१२॥ सर्वाधारधरानन्ते हि पार्थिमां मृत्तिकामिमां ॥ गृहीत्वापि प्रसन्ना त्वं लिंगार्थे भव मे सदा ॥१३॥
ततो मृदमुपादाय सक्तिं शर्करां चरेत् ॥ पात्रे निदध्यात्संशुद्धे प्रयत्नेन पूजनाय मे ॥१४॥ सहितेन सकृतो वाथ सूर्याक्षा
देवतो नराधिप ॥ गृहीत्वा यान्सु प्रपूजाया स्तथा गृहगणेशयोः ॥१५॥ मृत्तिकाहरणे नाम्ना हराय नम इत्यथ ॥ नाम्ना महे
श्वरायेति नमः संघट्टने भवेत् ॥१६॥ नाम्नाऽनंतः शूलपाणिर्नमः प्रस्थापनं चरेत् ॥ वहनाद्यावाहनादिते पीठे ॐ पि
नाकधृषे नमः ॥१७॥ स्थापयेदिति मंत्रेण पश्चात्काक्षतलोर्छिते ॥ कामनाभेदतस्तत्र त्रिर्वाप्यायेदने कथा
१८ ॥ ॐ पशुपतये नमः स्नापयेदिति मंत्रतः ॐ शिवाय नम इति पूजयेत्पंचोपचारकैः ॥१९॥ ॐ महादेवाय न
मो नमः मंत्रेणेति विसर्जयेत् ॥ ह्रीं गं ग्लौं गणपतये ग्लौं गं ह्रीं वभवाक्षरः ॥२०॥ ऐं हुं क्षें क्लीं कुमाराय नमो नमः
स्वाहद्वाक्षरैः ॥ इमान्मनून्गृहीत्वाथ जपेदष्टसहस्रकं ॥२१॥ दत्वा धूपं हृदि ध्यात्वा गृहंतं अंजलिद्वये
त्वथार्चनेऽष्टभे घस्त्रे प्रारभेत्त्वृष्टिसिद्धये ॥२२॥ कृतनित्यक्रियः शुद्धः प्रदायार्घ्यं विवस्वते ॥ मृदमादाय
तोयं च वं बीजेनाभिमंत्रयेत् ॥२३॥ आलिंप्यापि राद्ये त्वष्टमाना पात्रे निधापयेत् ॥ ततः कालमनुस्म
त्यकामनामपि हृत्क्रमां ॥२४॥ लिंगानि पार्थिवानीह पूजयेत्सुकामसंख्यया ॥ संकल्प्यैवं मृदः पिण्डादस
यात्स्पोमद्गुधीः ॥२५॥ गणेश्वरस्य मंत्रेण कुर्याद्वाल गणेश्वरं ॥ फलाभयलसत्पाणिं तुंडिलं चोद्धताम्ये
तं ॥२६॥ निर्माय स्थापयेत्पीठे ततो विघ्नः समाचरेत् ॥ न्यासं हृद्यादिविधिवत्तंपटीकरणान्वितं ॥२७॥

अविप्राणां भ्रमणस्यासंगोप्यं पार्थिवपूजने ॥ अस्य श्री पार्थिवाख्यस्य विद्याविंनामसरोर्मंत्रो ॥२८॥ निगुणात्मकं
कर्त्ता ब्रह्मा निगदितो भुवि ॥ देवमास्यात्स्कापड्गायत्री छंद इरितं ॥२९॥ ॐ ह्रौं वीं जं ह्रीं वंश जिनेमः कील
कमुच्यते ॥ अभीप्सितार्थसिद्ध्यर्थे विनियोगोऽस्ति पूजने ॥३०॥ ॐ ह्रीं ह्रीं श्रीं विजपूर्वां ल्न्यासेमंत्रान प्रवि
न्यसेत ॥ ध्रिगस्येति पदं वा तेन सौगादि समुच्चरेत ॥३१॥ सर्वज्ञाय प्रथमतः सर्वत्र प्राप चोत्तरां ॥ नित्यमनु
प्तशक्तये सर्वज्ञानशक्तये च ॥३२॥ नित्यानंदशक्तये चाः नन्तशक्तिशिवाय च ॥ कृत्वान्यांगलिविन्यासं हि
स्वलङ्घ्यादि भु ॥३३॥ केवलः ओत्रियालत्रमघोजाते तमप्तिकां ॥ नदीस्त्वावामदेवे नतलंदः चाविम
दयेत ॥३४॥ लिंगे कुर्यादघोरेणाच्येत्रस्तुतषेराच ॥ संज्ञाप्यतुड स्फन्नेनेईशानेनविसर्जयेत ॥३५॥
स्यादौ कृत्वागणेशानं पीठमध्ये निवेशयेत ॥ पश्चात्लिंगानि कुर्वीत यथेष्टानि समानि च ॥३६॥ अंगुष्ठ
मानादधिकं विनस्यवधिसुंदरं ॥ पार्थिवं रचयेत्लिंगं न न्यूनं नाधिकं क्वचित ॥३७॥ मधुजं क्षफलाकांक्ष
र्वकायसमृद्धिदं ॥ अतिवृष्टानदारिघं शिविपिठरोगसंभवः ॥३८॥ मानाधिके वियोगः स्यात्तत्स्यो सिद्धि
र्न जायते ॥ द्विवंगे शुभवेन्नस्य विपोनो तथा वं भवेत ॥३९॥ अवशिष्टमृदा कुर्यात्कुपात्रं तस्य मंत्रतः
स्थापयेत्लिंगपंक्त्या तेन मंत्रेणार्चयेत्ततः ॥३॥ तं सद्योजातादिपूर्वैलिनाममंत्रैर्वैदिकं ॥ अर्चयेत्पार्थि
वेलिंगं यथोक्तफलभाप्भवेत ॥४०॥ नारो ह्रौं ह्रीं ॐ सदृतिपंचवीजादिकैस्तते: । नंत्रिकोनाममत्रैल

फलार्थी शिवमर्चयेत् ॥४१॥ प्रासादवीजपूर्वैर्ल्लैर्वा मपार्गीसमर्चयेत् ॥ पराप्रासादवीजाद्यैः पूजयेन्मौलिक
म्कृतैः ॥४२॥ आवाहनस्थसमयैर्ईदृशं शिवमागमे लिंगप्रतिष्ठितं ध्यायेत्कामनाभेदलक्षनं ॥४३॥ सर्वत्रा
नाविधं ध्यानं योगिभिः कामदं पूजयेत् ॥ तत्र ध्यानमिदं ज्ञेयं नोक्तं गाधत्रनत्रच ॥४४॥ अथात्मानं शिवा
त्मानं पंचास्यं चिंतयेद्बुधः ॥ त्रिलोचनं चतुर्वाहुं सर्वाभरणभूषितं ॥४५॥ नीलग्रीवं शशांकांकं शुद्धस्फ
टिकसन्निभं ॥ नागयज्ञोपवीतं च व्याघ्रचर्मोत्तरीयकं ॥४६॥ कमण्डलुधरं देवं चाक्षमालान्वितं प्रभुं
वरदाभयहस्तं च नमज्जननरप्रदं ॥४७॥ वृषपृष्ठसमारूढमुमादेहार्द्धधारिणं ॥ उर्द्धं कपिलजटं शिवा
मुद्योतज्जुरिरां ॥४८॥ अमृतेनाप्लुतं दिव्यं दिव्यभोगसमन्वितं ॥ दिग्देवतासमायुक्तं सुरासुरनमस्कृतं
४९॥ नित्यं च शाश्वतं ध्रुवं ब्रह्मवरमक्षरमव्ययं ॥ एवं ध्यात्वा द्विजः सम्यक्ततो यजनमाचरेत् ॥५०॥ आरा
धितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः ॥ आराधयामि भक्त्या त्वां मां गृहाण सुरेश्वर ॥५१॥ स्वामिन्सर्व
जगन्नाथ यावत्पूजावसानकं ॥ तावत्त्वं प्रीतिभावेन लिंगेस्मिन्सन्निधो भवेत् ॥५२॥ एकैकं पूजये
ल्लिंगमेकैकं चाविसर्जयेत् ॥ अन्ते पूज्यः कार्त्तिकेयः पूजेयं विस्तरा नाम ना ॥५३॥ एकादशानामेकत्र
पूजनान्मध्यमा भवेत् ॥ सर्वेषामेव लिंगानां त्वरितेकत्रपूजनात् ॥५४॥ प्रत्येकमाचरेद्ध्यानं गंधं
पुष्पं पृथक्पृथक् ॥ धूपदीपान्नैवेद्यां वा यथांशेन निवेदयेत् ॥५५॥ प्रागादिवामावर्त्तेन दिक्ष्वष्टे

परिपूजयेत्॥ शर्वं भवं रुद्रमुग्रं भीमं पशुपतिं तथा ॥५६॥ महादेवम–शानं क्रमाक्षित्यादिमूर्त्तिकान्॥ सि
त्यप्रेजोनिलाकाशयजमानिंदुभास्करा॥५७॥ क्षित्यादयस्तुः शर्वाद्या स्नानंदुडादिकान्यजेत॥ धूपदीप
निवेद्यानि नमस्कारप्रदक्षिणान्॥५८॥ नमो जपं प्रकुर्वीत ॐ ह्रौं ह्रीं ह्रूं सउच्चरेत॥ ॐनमपश्च शिवोऽनःप्र
सत्रपदमुच्चरेत॥५९॥ पारिजातमाय त्वोरेनित्यएकविंशतिवर्णकं॥ पूजोने ह्रौं त्ररस्मजपेन्मंत्रमनन्यधी
६०॥ विल्वं वा विल्वपत्रं वा ह्यमाक्षं सलिलं कुनेन॥ एकादशाहुतिः पश्चात्त्रणपेदगुवाक्षिनो॥६१॥ प्र
णवादिचतुर्थ्यंते देवनमोन्विते॥ षड्युक्तं च यत्राममपत्नीउ-मोनमोंतिकां॥ पुनश्च तर्पणं
कार्यं नाहृङ्गीरेवनामभिः॥ द्वितीयोनेस्तर्पयापि विल्वपत्रजलाक्षतैः॥६३॥ भवः शर्वस्तथेशान
स्तूर्यः पशुपतिर्मतः॥ रुद्रोग्रभीममहत्नस्तुष्टोत्रे परिकीर्त्तिता॥६४॥ दंपतिभोजयेत्रिस्वपार्वति
शमनीं वया॥ शैवं वा भोजयेदेकमभावे वेदवित्तमं॥६५॥ एवमर्चयतः पुंसः पार्थिवलिंगपूज
मं॥ मासमात्रे राजसिद्धिः स्यान्नात्र कार्या विचारणा॥६६॥ अकृत्वा पार्थिवोलिंगे यो न्य देवं प्रपू
जयेत॥ वृथा भवति सा पूजा स्नानदानादिकाः क्रिया॥ काम्यकर्पाण्ययं कार्यो विविभ्रंगणविशेष
कं॥ नष्टलोऽडवविद्भेनविद्यार्थीनुसहस्रकं॥६७॥ द्वयोः पूजनमेकत्र मासमात्रं करोति चेन्

अवश्यं लभते विद्यां ध्यानमस्य निरूप्यते ॥ ६९ ॥ अनेनैव विधानेन पूजयेन्नवनीतजं । भवेद्धियाचसंप
त्तिश्चतुर्दिक्षु यशस्तथा ॥ ७० ॥ इत्थं वै नागरे लिंगे पूजितं बुद्धिवृद्धिकृत । एवं कृष्णागरो लिंगे पूजितं धा
रणाप्रदं ॥ ७१ ॥ वराकोऽवपिष्टस्य ज्ञागलिंगं तु बुद्धिकृत । प्रावृष्ठी हिमयं लिंगं कृत्वा हत्यापामवलाङ्कि
रे ॥ ७२ ॥ विद्याकामैस्थितनीयः परथं हरिसांवरं । ज्ञानमुद्रां दधद्धस्तैर्वैटपलमपार्थिवं ॥ ७३ ॥ यो चंये मन्त्रस्य हं
पंचशतान्येकं पृथक्पृथक ॥ पार्थिवानि तु लिंगानि पामाछः सर्वतोमुखी ॥ ७४ ॥ दक्षांकसंगजपतिप
स्वेष्वाम्हशनारदक्षदोर्लौवामोत्स्यांनगपतितनयांकेगृहत्वापरेण ॥ इष्टाभीतिपरकांपुगोधारयंत्रिंडु
कांतिरम्यादस्यांत्रिभुवननमो नीलकाण्ठत्रिनेत्र ॥ ७५ ॥ पुंसोर्विरुद्धयोः संधौ कुर्याद्युगन संख्यया ॥
नदीस्मीरद्भवानीनमुदानान्निचपूजयेत ॥ ७६ ॥ नत्रश्रेयो हरिहरः शांठपप्राप्तिभूलभ्यते । इडनीलहार
चेंडतिभोग्यक्षमायुजवान ॥ ७७ ॥ देवंग्योरवितेधार्थमर्द्धनारीश्वरः स्मृतः ॥ श्रीपूरपूर्णकलशंदधन्या
ङ्गां कुर्वादवपि ॥ ७८ ॥ पुत्रार्थी सार्द्धमासं कुर्यान्नागुलपिष्टजं । पार्थिवान्यथवा कुर्यादर्द्धलक्षमिता
नितु ॥ ७९ ॥ दक्षांकस्थमितिध्यानं पूजनं च पृथकपृथक । दधिभक्तेन नैवेद्यं पैष्टे मत्रयथेच्छया ॥ ८० ॥
स्माटकीपिष्टसंभूतं कांतार्थी ज्ञानपंचकं । पृथकहृदयं हृदयं पूज्यं ध्यानमत्र निरूप्यते ॥ ८१ ॥ कर्पूरगौ
रं करुणावतारं संसारसारं भुजगेंद्रहारं । सदारमंतं हृदयारविंदे भवं भवानीसहितं नमामि ॥ ८२ ॥

मारणार्थे समुद्भ्रान्ते लिंगे केशास्थिसंभवं ॥ अथवा लोहलिंगानि मृत्पुजान्यथवापि तु ॥ ८३ ॥ सहस्रमपिकुद्दाल
स्फलिंगान्युच्चाटने चरेत ॥ स्पज्ञानमृत्तिकाशाल्मलिद्वेषे वुलमाचरेत ॥ ८४ ॥ पूजयेत्कार्यवशतो लक्षाणि विं
सत्सहस्रतः ॥ उच्चाटे मारणे द्वेषे ध्यानतः पुनरीदृशः ॥ ८५ ॥ कालीहत्या वुजालेन्चः भूलको न हि क्षयः ॥ पुरा
पातालमन्त्राठोरावविज्ञासिता विनः ॥ ८६ ॥ विना ज्ञानेन मोक्षे तु नराणां यदि जायते ॥ तदा नु कोटि
लिंगानि पूजयेद्ध्यानमुच्यते ॥ ८७ ॥ यो योगमाया पहने च पुंसां तानि विधत्ते विलगक्तिनिष्ठे ॥ तं विश्व
नाथं कलिकिल्विषघ्नं ध्यायेच्छिवालिंगितहृद्देहे ॥ ८८ ॥ भोगार्थी लक्षमेकं तु कुर्यात्सुष्वमयानि तु
दिव्या भोगानवाप्नोति ध्यानमत्र निरूप्यते ॥ ८९ ॥ वंदे महेशं सुरासिद्धसेवितं वाल्मदुपारापगतं प्र
सन्नं ॥ पर्यंकगं शैलसुतासमेतं देवांगनागीतसुनृत्यहृष्टं ॥ ९० ॥ त्रिविप्रकाशीगमसाप्यलोकद्वय
लिंगाच्चया ॥ लिंगान्यपूजनसंख्यानि धात्रीफलभवानि तु ॥ ९१ ॥ सहस्रमात्रंपि तस्मायो लिंगानि प्रपूज
येत ॥ पथेप्सांलभते भूमिंत्रिसंख्यमेकमेव वा ॥ ९२ ॥ सहस्रात्रितये रूपकामो गोरोचनोद्भवं ॥ ताव
त्संख्यं कांतिकामः काश्मीरीसंभवं यजेत ॥ ९३ ॥ मधुपुष्पोद्भवं लिंगं वसंते शाननमर्चयेत ॥ प्रत्यहं जाय
ते कामी स्त्रीप्रियो ध्यानमत्र तु ॥ ९४ ॥ ध्यायेन्नित्यं महेशं रजतागिरिनिभं चारुचंद्रावतंसं रत्नाकल्पो
ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं ॥ पद्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वा

106

यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रं ॥ ९५ ॥ तीर्थार्थी द्विसहस्रं तु सप्त लिंगानि पूजयेत् । पृथक्पृथग्वि
ल्वदलैस्तत्र ध्यानपूर्वीयंत्रे ॥ ९६ ॥ विजितमदनदर्पं सर्पराजोपवीती धवलवृषभगामी यापिनीनाथयूडो
विधिहरिनतपाद्यैः पूजितः पूजनीयो दिशतु गिरिसुतायावल्लभो नो विभूतिं ॥ ९७ ॥ यक्षकर्दमतो लिंगं सहस्रं
प्राप्तिर्यद्धनं ॥ सहस्रं पंचकं कुर्यात्कुंडजं प्राप्तिहृदये ॥ ९८ ॥ लक्षं तु गुडलिंगानां पूजनात्स्वार्थियोगी भवेत् ॥ श्री
सहस्रं पूजयित्वा भर्तुः प्रियतरा भवेत् ॥ ९९ ॥ नवनीतस्य लिंगानि संपूज्येष्टमवाप्नुयात् ॥ भस्मना गोमय
स्यापि वालुकायास्तथा फले ॥ १०० ॥ त्रिसहस्रं सुहृत्कामी मासि मासि समर्चयेत् ॥ वर्षैकेनिश्चलभतां ज
गन्मित्रः संजायते ॥ १ ॥ ब्रह्मण्यस्त्वष्टशतं मासमात्रं समर्चयेत् ॥ सहस्रांस्तु पठनाद्देवगुरुतोप्याधिको भवे
त् ॥ २ ॥ प्राप्तगोमयलिंगानि त्रिसंध्यं यस्तु पि पूजयेत् ॥ वृहती बिल्वयोः पत्रैर्नैवेद्यं गुडमर्पयेत् ॥ ३ ॥ एवं मा
सत्रयं कुर्वन्नन्त्ये लभते धनं ॥ एकादशैव लिंगानि गोमयस्योत्थानि योजयेत् ॥ ४ ॥ प्रातर्मध्याह्नयोः सा
यं निशीथे प्रतिवासरं ॥ सम्पर्वाः संपदो यायात्त्वे राम्यासान्नैव मावरेत् ॥ ५ ॥ यत्र कुत्रापि मोक्षार्थं योगानां
वाथ भुक्तिनां ॥ इभूपानामष्टशतं त्रिपक्षं नित्यमर्चयेत् ॥ ६ ॥ यो यज्ञेत्विचुमंदोत्थैः पत्रैर्गोमयजं शिवं
कुंड्रमहेश्वरं ध्याय यस्य पराजयते रिपून् ॥ ७ ॥ हरिद्रापिष्टजं लिंगं सहस्रं यः प्रपूजयेत् ॥ स्तंभयेत्स सहस्राणां
पंचकेन महीपतिं ॥ ८ ॥ नित्यं पंचशतं कुर्यान्मासात्त्रिगडमोचनं ॥ उगंतिर्बुद्धिकामस्तु कुर्यात्पंचसहस्रकं ॥ ९

कारागृहादिमुक्त्यर्थं अयुतं कारयेत्सुधीः ॥ महारागानुनिवद्धस्तु वरापसाम्पो क्षमाप्नुयात् ॥१०॥ पूजयायुतलिंगा
नी महारोगान्भयं हरेत् । पुत्रार्थं गापंचशतं पूजयेच्चत्रिपक्षकं ॥११॥ शतद्वयं पुत्रहेतोर्योषा समेकं समर्चये
त् ॥ तस्य घोरभयं नास्ति मृत्युर्नायाति देहतः ॥१२॥ डाकिन्यादिभये सम्प्रसहस्रं वाथ निस्यहम ॥ शापात्पापे संपंच
शतकं योर्चयेत्सततं दंतक ॥१३॥ सहस्रपंचकं मासि योर्चयेद्वर्षपंचकं । पूर्वजन्मस्यपातकापि दारिद्र्यात्स विमु
च्यते ॥१४॥ एकादशदयजे त्रिसंज्ञा लिपिष्टमयानि यः । लिंगानि मासमात्रेण सकलपववयं दहेत् ॥१५
षः कृष्णैश्च तिलैः सम्यक्लिंगं कृत्वार्चयेन्नरः । वर्षत्रयं तस्य सर्वपापनाशः प्रजायते ॥१६॥ शिशिरेम
वेपुष्पोत्थं लिंगं योर्चयिवेन्नरः । निपापस्यात्रिवर्षेण पूजयेत्स्फाटिकं यदि ॥१७॥ कालवैधव्ययोगस्य
नाशार्थमयुतत्रयं ॥ लिंगानामभजेन्नैव कश्यकासं ननि लभेत ॥१८॥ यस्त्वेकादशलिंगानि रजतेनोथा
निपूजयेत् । पुत्रार्हं तं सर्वगुणान्नाम्यं तेस मुपस्थिताः ॥१९॥ लिंगास्त्वयुतसंख्यानि तिलपिष्टमयाणि
र्चयेत् ॥ पुत्रार्थं याकडसंख्यैव धीनगामपतिर्भवेत् ॥२०॥ ब्रह्महत्यापरिहारार्थं सौवर्णं लिंगमर्चयेत्
त्रिसंध्यं न ऋभोजी वरुडसूक्तपरायणः ॥२१॥ लघुनोऽष्टलिंगानि योभक्त्या पृथक् पृथक् । पूज
येत्तस्य सौभाग्यं नित्यं तस्यापि वर्द्धते ॥२२॥ यस्मात्त्वस्पृशिवं कृत्वा क्रमेकं पूजयेत् । शतमेकं
पुत्रहेतः स्त्रत्रं से त्वे भवेद्वहु ॥२३॥ अयुतं शर्करालिंगं वर्षकालेथवा पुनः । धत्तूरकुसुमोत्थानि लिंगान्ये

107

सप:
१०७

४८

कादशीं चयेत् ॥२४॥ यवमिश्रोद्भवं लिंगं वा कुर्याल्लवणाक्षया । कृत्वा चार्चनेल्लिंगानि वशीकुर्याज्जगत्त्रयं ॥२५
पथकशलत्रयं वल्कगोमयोत्थानि पूजयेत् ॥ पाण्डुरोगविनाशः स्यात्स्वरकासादमतागदाः ॥२६॥ फलं न जायते
दृष्टाद्यदिकस्यापि कर्मसाः ॥ फललिंगानि पूज्यानि तेन चार्चनसंख्यया ॥२७॥ दूर्वया वा गुडूच्या वा चार्चनेल्लिंगा
नि योर्चयेत् ॥ तस्याल्पमृत्युनाशः स्यात्तथा नीवारपिष्टजात् ॥२८॥ इन्द्रनीलस्य यो लिंगं मासमेकं प्रपूजयेत्
अथवाशास्त्रनेलिंगं तस्यासिद्धिं ति पौष्टिकं ॥२९॥ स्फाटिकस्य तु यल्लिंगं सर्वयोगेश्वरं उच्यते ॥ लक्षं तु पूजनात्त
स्य वरुत्वामित्वमाप्नुयात् ॥३०॥ पितृणां तृप्तिमोक्षार्थं मथवापि तु पूजयेत् । रजतस्य तदा लिंगमयुतं परिपूज
येत् ॥ ३१ ॥ अयुतं स्वर्णलिंगस्य पूजनं प्रकरोति यः ॥ स स्वलोकमाप्नोति नंकल्पं नात्र संशयः ॥३२॥ नागस्य वा
त्रयो राज्ञः कामः कांसस्य कीर्तये ॥ देहसौगंध्यमन्वा भाययगंधकोत्थं सदार्चयेत् ॥३३॥ अगरोद्भवराजंका
ष्ठजातमेकं तु निर्भर्त्तेः ॥ स सम्यपूजयेद्युसत्वरास्त्रनिमुच्यते ॥३४॥ कर्पूरजं तानि कामोगार्थं गोधूम
पिष्टजं ॥ मुद्गपिष्टसमुद्भूतं लिंगं पूज्यं त्रयं द्विजे ॥३५॥ कस्तूरीसंभवं लिंगं सहस्रं गंधकामुकः ॥ माषपि
ष्टमयं लिंगं नित्यमिष्टान्नसिद्धिदं ॥३६॥ यवधान्यमयं लिंगं यमलोकनिवारणं ॥ प्रियंगुपिष्टजं लिंगं
प्रियदं सर्वदेहिनां ॥३७॥ यः करोति तिलैः श्वेतैः स्वेतद्वीपमहीपतिः । यस्य यद्वाञ्छितं तस्य लिंगं कृत्वा
तदाप्नुयात् ॥३८॥ ग्रीष्मे च माघिकाद्युत्पे संभवाति सहस्रकः । अयुतानि पूजयेद्यालस्यष्ठादित्यतामह

पि॥३९॥ नीलोत्पलमयं लिंगं कृत्वा शारदि मानवः॥ यस्य कस्यापि कार्यस्य सिद्धिं प्राप्नोत्यसंशयं॥४०॥ हेमं
ते जातिकुसुमैर्लिंगं कृत्वा मनोहरं॥ भक्त्या सम्पूज्य मतिमान् शिवेन सह मोदते॥४१॥ कोमलेषु तु लिं
गेषु पार्थिवं श्रेष्ठमुच्यते॥ कठिनेषु तु पाषाणं पाषाणात्स्फाटिकं परं॥४२॥ स्फाटिकात्पद्मरागं च काश्मी
रं पद्मरागतः॥ काश्मीरान्मुक्ता गोमेथं इंद्रनीलोद्भवं ततः॥४३॥ इंद्रनीलाद्गोमेदं गोमेदाद्विद्रुमोद्भवं
वैद्रुमान्मौक्तिकं श्रेष्ठं तस्माद्धैमं राजतं॥४४॥ हैरण्यं रजताच्छ्रेष्ठं हैरण्यात्पारदं वरं॥ रीकान्तारदं श्रेष्ठं
बाणलिंगं ततः परं॥४५॥ नर्मदाजलमध्यस्थं बाणलिंगमिति स्मृतं॥ बाणासुरार्चितं लिंगं बाणलिंग
मिति स्मृतं॥४६॥ बाणलिंगे स्वयंभूते चंडको नाहतेप्सिते॥ चंडाय गणशाने कार्यं शंभोर्नैवेद्यभक्षणं
तं॥४७॥ ग्राह्याग्राह्यविभागोयं बाणलिंगे न विद्यते॥ तदर्पितं जलं वान्नं ग्राह्यं प्रासादवत्तथा॥४८॥ त्रि
वनाभमयं लिंगं सदा पूज्यं महर्षिभिः॥ यत्नतस्सर्वलिंगेभ्यस्त्वधिकं पूज्यतमं मतं॥४९॥ चतुरंगुलमु
च्छ्रायं रम्यं वेदिकया युतं॥ उत्तमं लिंगमाख्यातं पंचसूत्रैः सुसाधितं॥५०॥ तदर्द्धं मध्यमं प्रोक्तं तदर्द्ध
मवरं स्मृतं॥ तस्मान्न्यूनं पूजनीयं न कदापि न तत्फलं॥५१॥ रुद्राक्षं शिवलिंगं च स्थूलं स्थूलं प्रशस्य
ते॥ शालग्रामो नार्मदश्च सूक्ष्मात्सूक्ष्मो विशिष्यते॥५२॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाप्यनुलोमजः
पूजयेत्सततं लिंगं तन्त्रमंत्रेण सादरं॥५३॥ विप्राणां वैदिकेनैव मंत्रेणाराधनं वरं॥ तंत्रोक्तदीक्षितानां च

२०८

नेत्रो क्षेत्रविधानतः ॥ ५४ ॥ स्नानमाराधने शंभो नैव वैदिककर्म्मणा ॥ दधीचिगोतमादीनां शापनिर्दग्धचेतसां ॥ ५५
नजायते तथा श्रद्धा पूजा वैदिककर्म्मणि ॥ यो वैदिकमनादृत्य स्मार्त्तं कर्म तथैव वा ॥ ५६ ॥ अन्यत्तपाचरन्मर्त्योन
स कर्मफलं लभेत ॥ बहवः सिद्धिमेष्यंति कलौ पार्थिवलिंगतः ॥ ५७ ॥ कृते रत्नमयं लिंगं त्रेतायां हेमसंभवं ॥ द्वा
परे पारदं श्रेष्ठं पार्थिवं तु विधारयेत ॥ यथा कथंचिद्विधिना रमणीयं प्रकल्पयेत ॥ ६० ॥ द्विखण्डं तु प्रकुर्वीत
नैव पूजाफलं लभेत ॥ रत्नहेमवराल्लमपि च स्फटिकसंभवं ॥ ६१ ॥ एकखण्डप्रभवे लिंगमपि नरेकोयथावरं ॥
कुर्यान्नदेकखण्डे तु द्विखण्डे तु स्थिरं स्मृतं ॥ ६२ ॥ विप्राणां मृत्तिका श्वेता क्षत्रियाणां तथारुणाः ॥ विशां पी
ता वभ्रू शूद्राणां कृष्णा वा लभ्यते यथा ॥ ६३ ॥ भवाय भवनाशाय महादेवाय धीमहि ॥ उग्राय चोग्रनाशाय
शर्वाय शशिमौलिने ॥ ६४ ॥ विलोमानि पूजनार्थं मंत्रोयं परिकीर्तितः ॥ ततः पूजासमाप्तो तु दद्यात्पुष्पांज
लित्रयं ॥ ६५ ॥ जपः पंचाक्षरस्यापि कुर्याद्धोमन्तथानं ॥ वक्ष्यमाणास्तुतिं पश्चात्पठेद्देवस्य तुष्टये ॥ ६६ ॥
नमोंकारस्वरूपाय नमोक्षरवपुर्धृते ॥ नमो नादात्मने तुभ्यं नमो बिंदुकलात्मने ॥ ६७ ॥ अलिंगलिंगरूपा
यरूपातीताय वै नमः ॥ त्वं माता सर्वलोकानां त्वमेव जगतः पिता ॥ ६८ ॥ त्वं भ्राता त्वं सुहृन्मित्रं त्वं प्रियशि
वरूपधृक ॥ त्वं गुरुस्त्वं गतिः साक्षी त्वं पिता त्वं पितामहः ॥ ६९ ॥ नमस्ते भगवान्रुद्र भास्करामिततेजसे ॥ न
